7 95

नं० ८-६५-घ

काव्यप्रकाशटीका प्रदीपाख्यव्याख्या

सहित: (अलंकारशास्त्रम)

पत्राणि १४३

नं० ७५५-घ

१४३ पत्रे

काव्यप्रदीपाख्याकाव्यप्रकाशटीका १४१

का० प्र० १

ॐश्रीगणेशायनमः ॐनमःसरस्वत्यै ॐसोनोदेव्याःप्रथमतनयःकेशवस्यात्मजन्माश्रीगोविंदोरुचि-
करकवेःस्नेहपात्रंकनीयान् श्रीमन्नारायणचरणयोःसम्यगाधायचित्तं नत्वासारस्वतमपिमहःकाव्यत-
त्त्वंव्यनक्ति वचनसंदर्भविशेषरूपस्यग्रंथस्यपरिसमाप्तितत्वेनस्तोत्रमविनायास्मैव्यमानायाश्चवाग्देव्या
श्रास्यदभूतांकविभारतींनतदभिन्नत्वेनाध्यवसितांपरिसमाप्तिप्रतिबंधकदुरितनशानयेग्रंथकृत्स्तौति निय
तिकृतनियमरहितांह्लादैकमयीमनन्यपरतंत्रां नवरसरुचिरांनिर्मितिमादधतीभारतीकवेर्जयति १
नियमःसंनिवेशोरभादयोधर्मास्तेनेतिनियतिरसाधारणःपद्मत्वादिरूपोधर्मोदृष्टवाह्लादैकमयीमे
कस्वभावांह्लादमात्रस्वभावामितियावत् अनन्यपरतंत्रामिति कवेस्तत्प्रतिभायाश्चान्यायत्तात्मनपर
स्वदायतनत्वरहितां परतंत्रशब्दएवायन्नवचनइतिकश्चित् नवरसरुचिरामितिकर्मधारयहरूत्रोषड्रसा
नचहृद्यैवत्यैरितिव्यतिकरेष्वयदर्शनात् नचैवंहृद्यैवतैरितिहेरूपदर्शनवैयर्थ्यं नैक्तिक्कादिसाधा
रणैः षड्रसैरूपलक्षितायनोःतोनचहृद्यैवेतिनदर्शत्वात् अस्तत्वात्तीयात्तत्पुरुषएवनचैवंवा-
रसीतिरूपप्रसंगःत्रिगुणसचिवइत्यादिवदुपपत्तेः नचवृत्तिविरोधःनवरसरुचिरत्वरूपविशिष्ट-
धर्मव्यतिरेकस्तत्रान्यरसेष्वनवत्वाभावेनायोगव्यवच्छेदिहत्यप्रयोजकत्वविरहेणचेतिवृत्तिप्रतिपाद्य
त्वात् अत्रनिर्माणव्यतिरेकमुखेणचतुर्मुखात्कविभारत्याव्यतिरेकालंकारोव्यंग्यः नयाहिनियतेः
शक्त्यानियतरूपासुखदुःखमोहात्मकसत्वरजस्तमोलक्षणगुणत्रयात्मकत्वाद्दिश्वसमसुखदुःखा-

मोहस्वभावा परमाण्वादि यत्समवायिकारणं तदीयश्चयः संदत्तत्प्रभृति सहकारिपरतंत्रा मधुरादिषड्
रसा च न च मनोरसैव तैर्निर्मितत्वादि सोदृश्यवती च ब्रह्मणो निर्मितिरिति हि प्रसिद्धमेव एतद्विलक्षणा निय
तिकृतनियमरहितत्वादिधर्मवत्वेन तु कविभारती निर्मिति निर्दिष्टेति व्यक्तो व्यतिरेकः यदेतादृशधर्मशा
लिनी अत एव जयत्युत्कर्षेण वर्तत इत्यर्थः नन्तु वर्तनामित्यर्थः तथा समुत्कर्षस्यासिद्धत्वेन मस्कारादेप
कृतत्वानुपपत्तेः नन्वेतादृशगुरुकर्माणि प्रेक्षावतामिष्टदेवताप्रणतिरवश्यं दृश्यते भक्तिमतीव तदनेन नत्
तिमात्रमाचरता यत्नकृतानदृवलेपादृज्ञानाद्वा उभयथाप्यनवधेयवचनता प्रसक्ता अपकृते वतत्किंतु
तिवन्नोपनिबद्धा विशेषाभावात् सैव किं नोपनिबद्धेति चेत् उच्यते न खलु नतिमात्रोपनिबंधे स्तुतिर्नि
बद्धा भवति स्तुतिनिबंधे तथा नतिरपि सिद्धेव यतो जयत्यर्थेन वक्रविषयस्य च वैशिष्ट्यान्नमस्कार आक्षि
प्यते तेन नतिप्रतिष्ठा क्षिप्रणान इति लभ्यते यद्रूपकाव्यत्वसिद्धये व्यंग्यं प्रदर्शयति जयत्यर्थेन वेत्यादीति
वृत्त्यवतारणं तदयुक्तं प्रणमरूपव्यंग्यस्यानतिशायित्वेन ध्वनित्वाप्रयोजकत्वात् तदर्थं चातिशयितो
व्यतिरेकालंकार एवोपन्यासौचित्यादिति इहाभिधेयं ग्रंथस्वरूपमंगिनः काव्यस्य फलेन सफलमिति प्र
तावत्प्रवृत्त्यर्थं प्रतिपादयन्नाह २ काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये
कांतासम्मिततयोपदेशयुजे इह कृतन्वित प्रज शाह्याभावे किं वंता काव्यं लोकोत्तरवर्णनानिपुणस्वरू
पस्य कवेरसाधारणानागवर्णनात्मकं कर्म तत् कवेस्तावत् कालिदासादीनामिव यशः श्रीहर्षादेरपादा

का॰ प्र॰ २

नाम्राव्रुकादीनामिव धनं राजादिगतोचिताचारपरिज्ञानं मयूरशर्मादीनामिवानिष्टवाधनं करोति सहृ
दयस्य तत्काव्यश्रवणानंतरमेव सकलप्रयोजनेषूत्तरे स्थायिभावास्वादनसमुद्भूतं वेद्यांतरसम्पर्कशू
न्यं रसासाधनरूपमानंदं राजादिगतपृथिवीपालनादिसमुचिताचारपरिज्ञानं रामादिवद्वर्तनमिष्ट
साधनं ननु रावणादिवदित्युपदेशं च निर्मिमीते काव्यास्वादनकाले कवेरपि सहृदयांतःपातित्वाद्रसास्वा
दः ननूपदेशार्थं नीतिशास्त्राण्येव संति किं तत्र काव्येनेत्यत उक्तं कांतासम्मिततयेति शब्दस्तावत्त्रि
विधः प्रभुसम्मितः सुहृत्सम्मितः कांतासम्मितश्च तत्राद्यः शब्दप्रधानो वेदादिः शासनप्राधान्येन वि
धिनिषेधलक्षणः स हि प्रभुरिव त्वमेवं कुर्विति समाज्ञापयति ततश्च निष्क्रमसंध्यावंदनादौ निष्फले
पि प्रवर्तते द्वितीयस्त्वर्थतात्पर्यवान् सिद्धार्थरूपः पुराणेतिहासादिः स हि सुहृदिव एवं कृत इष्टं भ
वति एवं कृतश्चानिष्टं भवतीत्येतावन्मात्रं बोधयति न त्वाज्ञापयति तृतीयस्त्वाभ्यां विलक्षणो रसप्रधानः
काव्यलक्षणः तत्र हि सांगभूतो यो व्यापारो विभावादिसंयोजनात्मा व्यंजनारूपो वा तन्निष्ठपरसादिव्य
क्तिमित्यादिकतया शब्दार्थयोर्गुणत्वाद्रसस्यैव प्राधान्यं स च कांतासम्मिततयोपदेशं करोतीति तेनैत
दुक्तं भवति येमुक्तासारमनयोपि हृद्विस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्या
स्तत्काव्यं कांतेव सरसतापादनेनापि मुखीकृत्योपदेशं ग्राहयति गुरुजिह्विकया शिशूनिवौषधं य
दाहुः स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपभुंजते प्रथमालीढमधवः पिबंति कटु भेजमिति यत्तुपना

एतावदिष्टसाधनं काव्यमतमवश्यं तद्धेतुरुपादेयः नन्वेवमभिधेयं किमायातं किंच हेतुमत्त्वात्तदुपा
दानं कथं स्यादित्याशंकायां काव्यज्ञशिक्षारूपतया काव्यांगत्वं ग्रंथस्य प्रतिपादयन्नेव कारणं तदाह २ शक्तिर्नि
पुणता लोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे शक्तिः कवित्वबीजभूतो देवताप्र-
सादिजन्मसंस्कारविशेषः प्रतिभाव्यपदेश्यः तस्याः कारणतायां किं मानमिति चेत् निपुणतादिकारणांतर-
सद्भावेप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्य व्यतिरेकः स च विशेषस्य काव्यप्रसरस्य विशेषणस्यानुपहसनी
यत्वस्य वा व्यतिरेकात् सर्वत्रैवाविशिष्टं न चैवं कारणांतरं किंचिदायतु न तु शक्तिरिति वाच्यं प्रसिद्धातिरेकि एवं
वतद्धेतौ शक्तिव्यपदेशात् लोकः स्थावरजंगमात्मकः लोकवृत्तं योगादुपचाराद्वा धर्मिमात्रपरो सर्वस्य वु
समसनाधायकत्वात् शास्त्रं छन्दः शास्त्रादि काव्यं महाकविप्रणीतं रघुवंशादि आदिग्रहणादितिहासादि तेषां
विमर्शाद्व्युत्पत्तिर्निपुणता काव्यज्ञाः शिक्षा काव्यं कर्तुं रसानुगुणतया प्रबंधादौ घटयितुं ये जानंति तदुप-
देशतया करणे योजने च पौनःपुण्येन प्रवृत्तिरभ्यासः इति त्रयो मिलितो यस्याभाय अन्यथा न हेय[illegible]स्या
त् तथा च काव्यस्योद्भवे उत्कृष्टोत्पत्तौ हेतुतया कार्येण मिलितानामुपादानं दण्डचक्रादीनामिव घटे न तु
मिलितत्वेन कारणत्वेनेति भ्रमः कर्तव्यः ३ एवं तु कारणमुक्त्वा काव्यस्य लक्षणमाह २ तददोषौ शब्दार्थौ गुणा
वनलंकृती पुनः क्वापि १ निर्दोषत्वविशेषणविशिष्टौ शब्दार्थौ तत्काव्यमिति व्यवहर्तव्यं गुणास्य रसनिष्ठस्तेऽ
भिव्यंजकपदं गुणपदं ननलंकारेति व्याप्तिः सालंकारत्वे यि विशेषणानुपादानादिति न वाच्यं यतः क्वापीत्यनेन

का॰ प्र॰ १
3

तदुक्तं यत्सर्वत्र सालंकारौ शब्दार्थौ काव्यं क्वचित्तु स्फुटालंकारविरहेऽपि न काव्यत्वहानिः नञोऽल्पार्थत्वाद
लंकारस्यास्फुटत्व एव विश्रामात् नीरसेऽप्यस्फुटालंकारे काव्यत्वमिष्टमेवेति ऋजुः पंथाः वयं तु पश्यामः
नीरसे स्फुटालंकारविरहेऽपि न काव्यत्वं यतो रसादिरलंकारश्च हृद्यं चमत्कारे हेतुः तथा च यत्र रसादीना
मवस्थानं न तत्र स्फुटालंकारापेक्षा अतो ध्वनिकारेणोक्तं रसाद्यनुगुणार्थविशेषनिबंधनलंकारविरहेऽपि
छायातिशयं पुष्णाति मुनिर्जयति योगीन्द्रो महात्मा कुंभसंभवः येनैकचुलके दृष्टौ तौ मत्स्यकच्छपौ
अत्र हि अद्भुतरसानुगुणमेकचुलके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णातीति नीरसे तु यदि स्फुटा-
लंकारो न स्यात्तर्हि किंकृतश्चमत्कारः स्यात् चमत्कारसारं काव्यमित्यवश्यं स्फुटालंकारापेक्षा अनलंकृ
ती पुनः क्वापीत्यनेनास्फुटालंकारे क्वचिदेव काव्यत्वं यत्र रसादिः स्यात् ननु सर्वत्रेत्यनेनैव प्रतिपाद्यते
तस्मात्सालंकारमात्रत्वं न विशेषणं किंतु स्फुटालंकारसाधारणत्वं न चैवमपि रसवत्यनलंकारे का
व्यत्वप्रसंगो दोषायेष्टापत्तेः यथोदाहृते मुनिर्जयतीत्यादौ यदि तु अद्भुतानादरेण तत्रापि न काव्यत्वं तदा मा
स्तु अलंकारवत्त्वे सतीत्यपि पूरणीयमिति स्फुटालंकारविरहे काव्यत्वं यथा यः कौमारहरः स एव हि वर
स्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः सा चैवास्मि तथापि चौर्यसुरतव्या
पारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते अत्र रूपकादीनामसंभव एव अस्मीत्य-
स्य विभक्तिपरिणामादस्तु दीपकमिति चेन्न अस्मीत्यस्याहमर्थकाव्ययत्वात् अत्रास्मि करोमि सत्यमितिवत्

१

क्रियापदत्वेपि न दीपकत्वं तद्विनानां प्राकरणिकविषयत्वात् साहचर्यप्रतीतेश्च न तुल्ययोगिता सम्भ
योपि वक्ष्यमाणलक्षणेन संभवत्येव अतोहमाश्च न चारुत्वहेतुः विशेषोक्तिविभावने विद्यमानेऽपि न स्फु
टे कथमिति चेदित्थं विशेषोक्तिस्तावत्कारणसत्वेपि कार्याभाववचनं अत्र चानुत्कण्ठाकारणं वरोपकर
णयो रूपप्रक्रमानान्तमत्वे यद्यप्यनुत्कण्ठाभावः तत्कण्ठरूपो निर्दिष्ट एव तथापि नानुत्कण्ठाभावत्वेन कि
न्तूत्कण्ठात्वेनैवेति न स्यादस्फुटमस्याः यदि तु येन नोत्कण्ठितं नेत्यभिधीयेत तदास्फुटत्वं भवेत् एवं कार
णाभावेपि कार्योत्पत्तिवचनं विभावना अत्र चोत्कण्ठाकारणं वरोपकरणयोरनन्तरं दर्भावश्चोक्त एव य
द्यपि न तथापि नान्तनाविरहत्वेन किंतु तदारूपत्वेनैव अभावाभावस्य सत्त्वात् अतोस्याश्चापि स्फुटत्वमेव
न च स एवेत्येवकारेण अन्ताप्रभावप्रतीतेरनन्ताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यं विशेषेण संगते
नैवकारेण विशेष्ये विशेषणायोगव्यवच्छेदो हि प्रत्याय्यते न तु विशेषणाभावाभाव एव तस्य पर्यवसानं न
त्वेत्यस्फुटत्वमेव एवं विशेष्यसंगतेनाप्येवकारेण विशेष्यभिन्ने विशेषणाभावो नाहत्य प्रत्याय्यते किंतु वि
शेषणायोगाभाव इति द्रष्टव्यं अत एव शंखः पाण्डुर एवेति पार्थ एव धनुर्धर इत्यादौ न पाण्डुरः नान्य धनुर्धा
र इत्यादि कदास्फुटत्वार्थं प्रयुज्येत तदप्याह तत्र तु स्वतन्त्रत्वेनैव तुल्यं नान्येन केनचिदिति अत्र याऽन
रुक्तिस्तत्र स्यादित्यनयोरस्फुटत्वे सन्देहरूपसंकरोप्यस्फुट एवेति विभावनीयं साहचर्यप्रतीत्यभा
वान्न तुल्ययोगिता शृंगाररूपरसस्य सत्वाद्रसवदलंकारः स्फुट एवेति चेन्न रसस्यात्र प्राधान्यात् अ

का॰
प्र॰
५

प्राधान्यएवतस्यालंकारत्वेनोपगमात् अर्वाचीनास्तुयथोक्तस्यकाव्यलक्षणत्वेकाव्यलक्षणंनिर्विषयं प्रवि
रलविषयंवास्यात् दोषाणांदुर्वारत्वात् तस्माद्रसात्मकंकाव्यमितितल्लक्षणं तथाचदुष्टेपिरसान्वयेकाव्य
त्वमस्त्येवपरंत्वपकर्षमात्रंयदुक्तंकीटानुविद्धरत्नादिसाधारण्येनकाव्यता दुष्टेष्वभिमतायत्ररसाद्यनुग
मः स्फुटइतिएवंच अलंकारादिमत्त्वेउत्कर्षमात्रं नीरसेतुचित्रादौकाव्यव्यवहारोगौणइत्याहुः अथास्यभे
दांस्तल्लक्षणानिचाह २ इदमुत्तममतिशयिनिव्यंग्येवाच्याद्ध्वनिर्बुधैःकथितः १ इदंकाव्यंवाच्यादतिश
यिन्यधिकचमत्कारकारिणिव्यंग्यउत्तमं इत्यन्वयः यदिदमुत्तमंकाव्यंसचध्वनिःकथितः पदादिभिः
पदैः स्फोटरूपंशब्दब्रह्मव्यज्यते तस्मादभिव्यक्तादर्थप्रत्ययः तादृशस्यस्फोटव्यंजकस्य पदादिशब्दस्य
ध्वनिरितिसंज्ञेयेतिवैयाकरणानांसिद्धांतसरणिः अतःप्रधानीभूतव्यंग्यव्यंजकत्वसाधर्म्याद्गुणीभूतवा
च्ययद्व्यंगतद्व्यंग्यव्यंजनत्वमस्यशब्दार्थयुगलरूपस्योत्तमकाव्यस्यबुधैः पण्डितैर्ध्वनिरितिसंज्ञाकृता यथा
निःशेषच्युतचंदनं स्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनंजने पुलकितातन्वीतवेयंतनुः मिथ्यावादि
निदूति बांधवजनस्याज्ञातपीडागमावापीस्नातुमितोगतासिनपुनस्तस्याधमस्यांतिकं अत्रतदंतिकमे
वरंतुंगतासीतिप्रधमपदेनप्राधान्येनव्यज्यते नन्वत्रमुख्यार्थबाधाद्विपरीतलक्षणयातदंतिकमेवगता
सीतिलक्ष्यमेवयुज्यतेनतुव्यंग्यं अन्यथामाहेतीत्यादिवल्लक्षणमेवयुज्यतेनतुव्यंग्यं लक्षणामूलव्यंज
नोदाहरणेपिविपरीतलक्षणनस्यात् विशेषाभावात् इति अत्रकेचित् सम्यगत्रविपरीतलक्षणैवनिगू

यस्तु तदंतिकमेव गन्तासीत्यत्र लक्षणेति कल्पनायायोजनीयः व्यञ्जन इति रंतुमित्यनेनै ···· न्वीयत इत्याहुः
परमार्थतस्तु न खलु मुख्यान्वयायोग्यत्वं स्वरूपलक्षणबीजं किंतु ज्ञातं तथा च यत्र सख्यादेः प्रत्याय्यकामुकादि
संभोगः प्रमाणान्तरेणाप्रतीतः प्रतीतिपथमुपगतस्तत्र मुख्यार्थबाधादस्तु लक्षणा तदभिप्रायेणैव साहेत्योस
हि सहृदयडपहानं वहुसे इत्याद्युदाहृतं यत्र तु प्रमाणान्तरेणानवज्ञापकमवनर्वतिनहाकाजनित प्रत्यय महिम्नैव
तु तत्त्वत्यस्तत्र कथं लक्षणबाधाभावात् उन्मत्ते पिवाकार्थिवोधे भवत्रपिवा किंचित्करणेव तदभिप्राये णावा
पीत्यातु मित्युदाहृतं अत एवोक्तमथ स्वपदेन व्यञ्जन इति अत एव च सख्यादेस्ताटशत्वं प्रमाणान्तरेणावगतं
तत्र न माहिंतीत्यादौ विपरीतलक्षणा व्यंग्यार्थप्रतीतावाधीत्यातु मित्यादौ तु बाधानवतारेपि अथ मपदार्थपत्र
लोचनयायथोक्तं व्यंग्यं प्रतीयत एव त्वेवं प्राधान्यमदमयदस्य तस्मान्माहंतीत्यादौ यदि व्यंजनात्दा लक्षण
मूलैव वाधीत्यातु मित्यादौ तु न नियम २ अताटशिगुणीभूतव्यंग्यं व्यंगे तु मध्यमं १ अताटशिवाच्यादनतिशा
यिनि अतिशयचमत्कारानाधायके व्यंग्ये मध्यमं काव्यं तद्गुणीभूतव्यंग्यं कथितं इत्यनुषज्यते अत्र व्यंग्ये
स्फुटव्यंग्य इत्यर्थः नेनेनाधमकाव्यतातिव्याप्तिरिति केषांचिन्मतमयुक्तं अगूढस्य परस्यांगमित्यादिना गु
णीभूतव्यंग्यप्रभेदत्वेन प्रतिपादयिष्यमाणस्फुटव्यंगस्यासंग्रहापत्ते किंतु स्फुटतरातिरिक्तमात्रव्यंग्यं तु
धमकाव्येत्वस्फुटतरं तद्धि रहृएवं वेतिन कदाचिदनुपपत्तिः उदाहरणं ग्रामतरुणं तरुण्या नववंजुल
मंजरीसनाथकरम् पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया अत्र वंजुललतागृहे दत्तसंकेता

तरुणीनगतेतिव्यंग्यं तस्य गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् यतः पश्यंत्या नितरां मुहुर्मुहुरुड
वच्छायामलिनीभवतीति अनेन दर्शनकालपतत्कार्यमालिन्यं तस्यातिशयः सांतत्यमानतावाच्यं च चम-
त्कारि अनुभावत्वेन विप्रलंभपोषकं प्रतीयतेऽइति २ शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतं अत्र चित्रमि-
त्यध्याहार्याम् तेनाव्यंग्यं काव्यं काव्यमवरमधमम् तच्चित्रमिति कथितमित्यर्थः अव्यंग्यमस्फुटतरा-
तिरिक्तव्यंग्यरहितं तादृशं चास्फुटतरव्यंग्यसद्भावे व्यंग्यमात्राभावो वा चित्रं गुणालंकारयोगि शब्दचित्रं य-
था स्वच्छंदोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय
वः भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमयोर्मिमेदुरमदा मंदाकिनी मंदताम् अत्रानुप्रा-
स शब्दालंकारः ननु कथमेतदव्यंग्यमुच्यते मंदाकिनीविषयायाः प्रीतेरभिव्यक्तेः किंच नास्त्येव सकाव्यार्थो
यस्य न व्यंजकत्वं अंततो विभावत्वेनापीति चेत् सत्यं किंतु तद्व्यंग्यमस्फुटतरं यद्वा तत्र न कवेस्तात्पर्यमनु-
प्रासमात्र एव तस्य संभ्रमात् तात्पर्यविषयीभूतव्यंग्यविरहवत्त्वमेव वाव्यंग्यपदेन विवक्षितं यदुक्तं ध्वनिकृ-
ता रसभावादिविषयविवक्षाविरहे सति अलंकारनिबंधो यः स चित्रविषयो मतः इति अत्र पदे मध्यमका-
व्यलक्षणे व्यंग्यपदं विवक्षितव्यंग्यपरं द्रष्टव्यं अर्थचित्रं यथा विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य
यदृच्छयापि यं ससंभ्रमेंद्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावतीति अत्रोत्प्रे-
क्षार्थालंकारः इति प्रांच उदाहरंति परंतु रसादौ कवेस्तात्पर्यविरहाऽस्फुटतरत्वं वा तत्र ज्ञायते हयग्रीवस्यव

णीनीयतया तस्य भावस्य स्फुटं प्रतीतेः मदीयं तु पद्यमुदाहरणीयं मध्ये व्योम्नः स्फुरति हिममनोधन्विनः शा-
णचक्रं मंदाकिन्या विपुलपुलिनाभ्यागतो राजहंसः शाङ्कः छेदे त्वरितचरणन्यासमाकावलक्ष्याः संसर्पन्त्याः
श्रवणपतितं पुंडरीकं मृगांकः अत्र रूपकमर्थालंकारः तन्मात्रेण त्वत्र्यं न तु रसादौ २ इति महामहोपा-
ध्यायगोविंदठक्कुरकृते काव्यप्रदीपे काव्यलक्षणनिर्णयः प्रथमोल्लासः १ अथ काव्यलक्षणपदार्थेषु
स्वरूपलक्षणादिभिर्विवेक्तव्येषु शब्दार्थयोः प्राधान्यात् प्रथमं तयोः स्वरूपं निरूपयिष्यंस्त्विभागमाह २
स्याद्वाचको लाक्षणिकः शब्दोत्र व्यंजकस्त्रिधा १ शास्त्रे व्यंजकः शब्दो न प्रसिद्ध इत्यत उक्तमत्रेति अत्रेति का-
व्ये शब्दस्वरूपप्रतिपाद्ये वलाचवानर्थं विभजते २ वाच्यादयस्तदर्थाः स्युः १ वाच्यादयो वाच्यलक्ष्यव्यंग्याः क्रमे-
ण तेषां वाचकादीनामर्थाः स्युः २ तात्पर्यार्थोपि केषुचित् १ केषुचिन्न्यायादिनयेषु न तु मीमांसकादिमतेष्वपि ला-
घवान्नदानां पदार्थमात्रे शक्तिः न त्वन्वये चेपि गौरवादन्यलभ्यत्वाच्च तदंशो हि तात्पर्यार्थः वाच्याद्यर्थविल-
क्षण शरीरप्राकंक्षायोग्यतासन्निधिवशादपदार्थोपि प्रतीयते न चापदार्थप्रतीतावतिप्रसंगः स्वरूपम-
तः प्राकान्वयत्वस्य नियामकत्वादित्यभिहितान्वयवादिनां मतं अन्वयरूपे वाक्यार्थेपि पदार्थानां शक्ति-
र्व्यवहारेणान्वितस्यैवोपस्थानात् तत्रैव शक्तिग्रहात् किंचान्वययोग्यस्याशक्यत्वेनुभवविषयत्वं न स्यात् न
हि विषयत्वे शाक्यत्वस्य प्रयोजकत्वात् अशक्यस्याप्यनुभवप्रवेशे अतिप्रसंगादन्विताभिधानवादिनां मतं
व्यंजकत्वेन केवलं शब्दस्य किंतु तदर्थस्यापि तत्रापि नैकतरस्य किंन्तु सर्वस्यापीत्यभियावेयर्म्मसिद्धये

का॰ प्र॰ ९

प्रतिपादयति २ सर्वेषां प्रायशो र्थानां व्यंजकत्वमपीष्यते १ तत्र वाच्यस्य यथा माए घरोवअरणं अज्ज
हु नत्थि त्ति साहिअं तुमए ता भण किं करणिज्जं एमेअ ण वासरो ठाइ अत्र वाच्ये नैकार्थे न वक्तृवैशिष्ट्यात्स्वैर
विहारार्थित्वं गृहोपकरणादिनाचावश्यविधेयत्वादिकं लक्ष्यस्य यथा साहेंती सहि सुहअं खणे खणे दू
मिआसि सज्जकए सब्भावणेहकरणिज्जसरि अंसदाव विरिईआनुसय अत्रापकारिण्यां वाच्यावनारासन्तुख्या
धेः श्रोत्रा प्रत्येतुं न शक्यत इति सद्भावस्नेहकरणीयसदृशमन्यप्रियरमणेन शाठ्यत्वाचरणरूपं विरचितं-
मिति मुख्यविपरीतं लक्ष्यते तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं व्यंग्यस्य यथा उअ णिच्चल-
निष्पंदा भिसिनीस्मि रेह पबला आ णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व अत्र निष्पंदत्वेनाश्व-
स्तत्वं तेन निर्जनत्वं अतः संकेतस्थानमेतदिति कयाचित्कंचित्संकेतस्थानाभिलाषिणं प्रति व्यंजनतया
प्रतिपाद्यते अथवा निस्पंदत्वेनाश्वस्तत्वं तेन जनागमनाभावो नातो नत्वमत्रागत इति मिथ्यावदसि इति क-
याचिद्दत्तसंकेतात्वेनागताहं नागत इति वादिनं प्रति व्यज्यते एवमर्थं विभज्य वाचकादीनां स्वरूपं क्रमे-
णाह २ साक्षात्संकेतितं योर्थमभिधत्ते स वाचकः १ अभिधत्ते प्रतिपादयतीत्यर्थः अतो न विशेषणं तद-
वैयर्थ्यम् संकेतितं गृहीतसंकेतं इदं चेष्टायाः साक्षादर्थप्रतिपादकाया मतिव्याप्तिवारणाय मा भूदिति व्यं-
जकस्य धूमादिर्वा इति व्याप्तिवारणाय वा न च साक्षादित्यधिकं यत्संज्ञाया यत्र चेत्यादिर्विषयोपि सताद्दश इ-
त्यादिव्यवहितसंकेते सत्वेपि चेत्यादियोगिनिविषये प्रतिपाद्ये चैत्यादिपदे इति व्याप्तिवारकत्वात् न त्र शक्य

९

संकेतव्यवहितसंकेतत्वात् नच तत्र शक्तिरेवेति सम्यक् नद्योगिनितत्संयोगस्य लक्षणयैवोपपत्तेः नच
साक्षात्संकेतवान्वाचकः इत्येतावतैव स्वस्थैतेऽभिधत्तेः इत्यस्य वैयर्थ्यं संयोगादिनाभिधायां नियमितायां वा
च्यार्थव्यंजकतादशायामतिव्याप्तेर्वारणीयत्वात् नच तथापि न जातिव्याप्तिरिति वाच्यं यस्य शब्दस्याव्यवहि
तसंकेतो यत्र यदा च यदर्थग्रहाउपयुज्यते तत्र तदा स तत्र वाचक इति हि लक्षणार्थः अथ संकेतग्रहस्य श
ब्दसहकारितावां किं मानमिति चेत् अगृहीतसंकेतशब्दाद् अर्थप्रत्ययाभावः इदं च यत्र यस्याव्यवधानेन संकेतो
गृह्यत इत्यादिवृत्तिदर्शनात् संकेतविशेषणतया साक्षात्त्वं व्याख्यातं वस्तुतस्तु संयोगादिनाभिधायां निय
मितायां यत्र शब्दान्तरव्यवधानं तत्र वाचकत्वं सार्वसाक्षादित्यभिधानक्रियाविशेषणं साक्षादिति नत्र नु वाक्या
र्थप्रतीतिव्यवधानेन न तत्प्रतीतिरित्यप्रसंगः नच संकेतितः पदवैयर्थ्यं लक्ष्यप्रतीतावपि वाक्यप्रतीतिव्यवधा
नाभावात् स्पर्शादिवर्णानां साक्षादेव माधुर्यव्यंजकत्वात् भास्करस्तु लक्ष्यस्याप्यन्विताभिधानन येसंकेतित
त्वात्तज्जातिव्याप्तिवारणाय साक्षादिति विशेषणं तदनभ्युपगमे तु साक्षादभिदत्ते संकेतितमभिधत्त इति ल
क्षणं हृद्यं नचाद्यस्य चेष्टायामतिव्याप्तिः शंकास्य प्रकरणादेवलाभादित्याह नन्नसाक्षात्संकेतो गृह्यत इ
ति वृत्तौ साक्षात्त्वस्य संकेतविशेषणतया व्याख्यातेन विरोधाउपेक्षणीयं किंच प्रथममाधुर्यादिव्यंजकस्प
र्शादिवर्णेषु अतिव्याप्तिः तेषां साक्षादेव शृंगारादिव्यंजकत्वात् द्वितीयं तु वाच्यस्य व्यंगतादशायामति
व्याप्तेः नच तत्रेष्टापत्तिः संकेतवान्वाचकः इत्यस्यैव तदा सम्यक्त्वे तच्छेषवैयर्थ्यात् २ संकेतितस्तु भेदो

का॰ प्र॰ ८ 7

जात्यादिर्जात्यादेर्वा । नन्वेवं विभागोनुपपन्नः जात्यादेरसंकेतितत्वात् अर्थसंकेतग्रहस्य व्यवहारार्थत्वा-
त्प्रवृत्तिनिवृत्तियोग्यायां व्यक्तावेव तदौचित्यादिति मैवं किंहि व्यक्तिषु सर्वासु संकेतग्रहो व्यवहारादुत य
स्यां कस्यांचित् नाद्यः आनंत्यात् नांत्यो व्यभिचारप्रसंगात् यतोगृहीतसंकेतगोपिण्डस्येव घटादेरपि गो
पदात्प्रतीतिः प्रसक्ताः अगृहीतसंकेतत्वस्य तुल्यत्वात् किंच न यत्र संकेतग्रहस्तस्यापि प्रतीतिरिति
व्यभिचारान्न व्यक्तौ संकेतः अपि च व्यक्तिसंकेतः यद्देगोः शुक्लश्चलो डित्थ इत्यादिशब्दानामर्थभेदो न
प्राप्नोति किमेवमनिष्टमिति चेत् सहप्रयोगानुपपत्तिः तस्मादुपाधावेव संकेतः स च द्विविधः
स्वभावतो वस्तुवृत्तिर्घटत्वादिः वक्तृयदृच्छया संनिवेशितो नामरूपः तत्राद्यो द्विविधः सिद्धः साध्यश्चेति
सिद्धोपि द्वेधा पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च प्राणप्रदत्वं च यावत्स्थिति संबंधित्वं यद्यपि शुक्ल
त्वादेर्नित्यत्वादेर्नित्यत्वाभ्युपगमे गोत्वादिना सममकालसर्वसंबंधित्वं तथापि तस्य संबंधः कदाचिद्यै
त्यपि न तु गोत्वादिरिति विशेषस्तत्र प्राणप्रदो जातिः उक्तं हि वाक्यपदीये न हि गोः स्वरूपेण गौर्नाप्यगौः गो
त्वाभिसंबंधात्तु गौरिति ग्रस्यार्थः गोः स्वरूपेण न गोव्यवहारस्य नाप्यगोव्यवहारस्य विषयः गोत्वाभि
संबंधात्तु गोव्यवहारस्य विषय इति तथा च प्राणप्रदत्वमस्य सिद्धमिति विशेषाधानहेतुस्तु गुणः गो
त्वादिना लब्धसत्ताकं हि वस्तु शुक्लादिना विशेष्यते साध्यस्तु पूर्वापरीभूतैकदेशतेन विवक्षितः क्रिया
रूपा छेदनादि यदुक्तं यावत्सिद्धं त्वा मसिद्धं वा साध्यत्वेन विवक्षते आश्रितक्रमरूपत्वात्सा क्रियेत्यभि

२

धीयते इति वक्तृयदृच्छया सन्निवेशनस्तु शब्दरूप डित्थादि शब्दानां प्रथमो वर्णप्रतीत्यादि किंचित्प्रका
शितमंत्यवर्णबुद्ध्या विशेषितो ग्राह्यं नानावर्णात्मक पदादि पदवद्वर्णक्रमभूतं स्फोटाख्यं शब्दस्वरूपं डि
त्थादिष्वर्थेषूपाधित्वेन वक्त्रा यदृच्छया कल्पित इति संज्ञारूप यदृच्छयात्मक डित्थादि शब्दः वर्णादी
सत्तु अंत्यस्वलक्षणबुद्ध्या निशेषितो ग्राह्यं यस्य नजाति प्रतीत्यनंतरं व्यक्ति प्रतीतिरिति क्रमभूतं च डि
त्थादीनां शब्दानां स्वरूपं डित्थादिष्वर्थेषूपाधित्वेन पदार्थोपस्थित्यनुकूल कूलतया संकेत्यते उपाध्य
न्तरं तेषां नास्ति किंतु धर्मिमात्रं ततः प्रतीयत इति वृत्त्यर्थमाह नच भाष्यविरुद्धं न च शब्दस्येनोपाधि
त्वेन व्यवस्थापनात् डित्थादिशब्दात् डित्थादिनामायमिति प्रतीतेः एवं हि गौः शुक्लश्चलो डित्थ इत्या
दौ चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्यकारः नन्वेवं परमाण्वादि शब्दानां जातिशब्दत्वं स्यान्न गुणशब्दत्वं
परमाणुत्वादीनां गुणपदत्वेन जातित्वादिति चेत् सत्यं जातिशब्दा एव ते वैशेषिकनयानुसारेण तु न
न गुणशब्दस्य व्यवहारः ननु घटादिनिष्ठानां शुक्लादिगुणानां गुडतंडुलादिनिष्ठानां पाकादिक्रियाणां
च भेदस्य प्रत्यक्षत्वात् ततः सिद्धो व्यक्तिसंकेतपक्षोक्तदोषः समान इति चेन्न गुणादीनां स्वरूपेण एकरूपाणां
माश्रयभेदाद्भेद इव लक्ष्यते यथैकस्यैव मुखस्य खड्गमुकुराद्यालम्बनभेदात् अपरे तु हिमपयः शं
खादिषु शुक्लादिगुणः परमार्थतो भिन्न एव पाकाच्छुक्लरूपं नष्टं एषाम् अनुत्पन्नमिति प्रतीतेश्चैवं यश्च
नि बाधकाभावात् न चोत्पादविनाशौ च समवायस्य प्रतीयेते इति शुक्लं नदनुल्लेखात् तथा चानुगतमप्र

का॰ प्र॰ ८ ४

पानुरोधेन तत्रापि शुक्लत्वजातिः लाघवाच्च तत्रैव संकेत इत्य पर्यें एवं गुडतण्डुलादिष्वपि पाकत्वादि
कं तथा तारत्वादिविरुद्धधर्माध्यासाद्बालवृद्धशुकादीरितडित्यादिशब्देष्वेव डित्याद्यर्थेष्वपि बालाद्य
वस्थापरिणतनानापरिणामस्वरूपविरुद्धधर्माध्यासाद्भिन्नेषु डित्यादिकं जातिः सैव च डित्यादिपदः
शक्यापकत्वादि संगीकर्तव्यं एतेन बालवृद्धशुकाद्युदीरितेषु डित्यादिशब्देषु च प्रतिक्षणं भिद्यमाने
भिन्नाद्यर्थे वा भिन्नादित्वमस्तीति व्याख्यातं इत्यर्थे न वा शब्दे न च शब्दस्य स्थाने विनियमात् यद्वा सर्वेष्वे
व वाच्येषु सामान्यमस्तीत्यत्र न ताकतात्पर्यं अथवा भाष्यकारमते डित्यादिशब्द एवोपाधिरिति तन्मते
पि शब्दस्य नानात्वान्निष्ठा जातिरेव वक्तांगीकार्येति तात्पर्यं तस्मात्सर्वशब्दानां जातिरेव संकेतितः
विषय इत्याहुः येषां मते सत्ता शब्दानां शब्देनोपाधिः किन्तु ततो धर्मिमात्रप्रतीतिस्तेषां मतेऽप्यस्मिंमते
व घटाकाशादिशब्दानां कथं जातौ संकेत इति चिंत्यं नैयायिकास्तु न व्यक्तिमात्रं न वा जातिमात्रं शक्यं आ
द्ये, अनन्त्याव्यभिचाराच्च अन्ये व्यक्तिप्रतीत्यभावप्रसंगात् न चाक्षेपाद्व्यक्तिप्रतीतिः तस्माद्विशिष्ट एव सं
केतः न चानन्त्यादशक्तत्यव्यभिचारो वा गोत्वादिसामान्यलक्षणया सर्वव्यक्तीनामुपस्थितौ सर्वत्र सं
केतग्रहणसौकर्यादित्यादिति ष्टंते सौगतास्तु व्यक्तावानन्त्यादिदोषाद्भावस्य च देशकालाद्यननुगमाभावा
त्तदनुगतायामनवस्थापत्तौ संकेतस्यादिमतानि प्रकृतानुपयोगान्न सूत्रकृता दर्शितानि ननु वाच्यलक्षणं
णपदार्थ इति विभागोऽनुपपन्नः लक्ष्यत्वेन प्रसिद्धस्य तुर्यस्यापि भावादित्याह सतख्योऽर्थस्तत्र मुख्यो वा

व्यापारोस्याभिधोच्यते साक्षात्संकेतितनयवार्थोमुख्यत्वेन प्रसिद्ध इत्यर्थः कथमसौ नयेत्यत आह तत्र मुख्यो व्या
पारोस्याभिधोच्यते अस्य शब्दस्य तत्रार्थे योभिधारूपो व्यापारः स मुख्य उच्यत इत्यर्थः यद्वाभिधाव्यव
हारस्य नाभिधासमयाभावादित्यादौ दर्शनान्नीलक्षयति तत्र मुख्य इत्यादि तत्र यो व्यापारः सोभिधेत्युच्यत इ
त्यर्थः मुख्यतो त्वोक्तीनेनच वक्ष्यमाणलक्षणयास्तथाभिपूर्वकत्वं पूर्वमेव मुख्यत्वं ह्यथ पुरस्सरत्वोपपन्नये।
यन्नमुख्यार्थबाधे तद्योग इत्यादिकारिकोपयुक्तेन वाच्यस्य सत्तांतरं करोति स मुख्य इत्यादीति सूत्रावतरणं।
तदयुक्तं वाच्यार्थबाधे तद्योग इत्येवमेव तत्रोपपन्नोतदर्थमज्ञानतरकरणस्य गौरवेनानौचित्यात् वाचकादि
लाक्षणिकलक्षयितं लक्षणं लक्षयति मुख्यार्थबाधे तद्योगे रूढितोथ प्रयोजनात् अन्यर्थो लक्ष्यते यत्सा
लक्षणारोपिता क्रिया रूढिप्रसिद्धि प्रयोजनं व्यंग्यार्थप्रतिपादनरूपं क्रियाव्यापारः अन्यार्थो यत्र लक्ष्यते सा
लक्षणेति लक्षणलक्षणे प्रतिपाद्यत इत्यर्थोनोनान्वयः मुख्यार्थबाधः शक्यसंबंधो रूढिप्रयोजनान्य
तरश्चेति हेतुत्रयवचनं व्यंजनायां शक्तिस्मृतोचाति व्याप्तिवारणाय तद्योग इति लक्षणेपि प्रवेशनीयं योग
स्य च हेतुत्वं विवक्षितमतो न मुख्यार्थसंबंधे व्यंजनायामप्यतिव्याप्तिः तुल्यसाम्याभिधारूपमुख्यार्थसंबंधेन
प्रतिपादनं संभवतीति तत्कारणयान्यक्तं अनेनामुख्यः यदिति गुणीभूतलक्षणाक्रियामात्रपरामर्शः तेन श
क्यसंबंधेनाशक्यप्रतिपत्तिर्लक्षणेति प्राचीनमतेनैतल्लक्षणं प्राचीनमते नैतल्लक्षणं हेतुः तद्धेतुः शक्यसं
बंधो लक्षणेति तु परमार्थः प्रतिपत्तिहेतुर्हि वृत्तिः नतु प्रतिपत्तिरेव यत्तु यदित्यस्य यत इत्यर्थकतया संबंधप

का॰ प्र॰ ८ 9

रनयैवस्तुच व्याख्यानं तदयुक्तं नाभिधासमयाभावादित्यभावात्र लक्षणेत्यत्र स्वार्थबाधादित्रयं हेतुः
रिति व्याख्यानविरोधात् न हि सम्बंधस्वरूपत्वे लक्षणायाः संबंधो हेतुर्घटते न च शक्तिपन्निप्रस्तुहेतोः
व्यापारः प्रतिपादनं चेल्लक्षणा न तर्हि शब्दधर्मः गंगादिशब्दानां तीरादिकमुपस्थाप्य विरामे तीराद्यर्थेनैव स्व
संबंधेन तीराद्यर्थप्रतिपादनादित्यत आह आरोपिता क्रियेति शब्दविवक्षितलक्ष्यार्थविषयत्वाच्छब्दे आ
रोपितस्य व्यापारः वस्तुतोर्थनिष्ठ एवेत्यर्थः तदेतदुक्तं मुख्यार्थाधीनविवक्षितस्तीराद्यर्थः तन्निष्ठः सा तदर्थ
निष्ठः इति रूढितो यथा कर्मणि कुशल इत्यादौ दर्भग्रहणयोग्यत्वान्मुख्यार्थबाधः विवेचकत्वं च सं
बंधः एवमन्यत्राप्यूह्यं तथा च तैलंगादिजनपदशब्दाज्जनेत्वं क्व शब्दस्त्वर्थलिंगेन्द्रिये प्रयोजनाद्यथा गंगायां
घोष इत्यादौ अत्र हि गंगातीरे घोष इति मुख्ये च शब्दात्तादृशपावनत्वं न प्रतीयते यादृशं गंगायां घोष इति लाक्ष
णिकात् लक्षणा तावद्द्विविधा शुद्धा गौणी च तत्राद्या द्विविधा उपादानलक्षणा लक्षणलक्षणा च तेऽपि प्रत्येक
सारोपा साध्यवसाना चेति द्विविध इति षड्भेदा अतस्ताः गौणी तु द्विविधा सारोपा साध्यवसाना चेति षड्विधं
लक्षणायाः कारिकाद्वयेन प्रतिपादयति स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं उपादानं लक्षणं चेत्युक्ता शु
द्धैव सा द्विधा स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये पराक्षेपः परलक्षणं स्वार्थापरित्यागेन परार्थलक्षण
मुपादानमित्यर्थः अतः काकेभ्यो दधि रक्ष्यतामित्यस्य न तृतीयभेदत्वं एवं परार्थं स्वसमर्पणं परस्यान्वयप्र
वेशसिद्ध्यर्थं स्वसमर्पणं परस्यान्वय स्वार्थपरित्यागेन परार्थलक्षणं काकानां दधिभक्षणानिवारणान्वय ८

सिद्धये न दध्युपघातकबिडालाद्याक्षेपः तेन विनापि तदन्वयसिद्धेरिति इतोऽस्मत्तृतीयभेदस्तन्निवारणाय तत्रा
नत्रापरित्यागेन परार्थमित्युक्तं लक्षणमित्यर्थः एताभ्यामुपाधिभ्यां शुद्धैव गृहीतोक्ता न तु गौण्यपीत्यर्थः एते
एवान्यत्राजहत्स्वार्थाजहत्स्वार्थेत्युच्येते ननु शुद्धैवेत्यनुपपन्नं गौण्यामपि तयोः संभवात् तथाहि गौर्वाहीक
इत्यादौ लक्षणलक्षणा तावत्स्फुटैव उपादानलक्षणा गौर्वाहीकौ भयविषये गाव एते समानीयन्तामित्यादावि
ति चेन्नैवं अत्रोपचारबीजं संबन्धः सादृश्यस्य शक्यवृत्तित्वेन या कथं शक्यस्यापि लक्ष्यता येनोपादानलक्षणा स्यात्
सादृश्यभिन्नसंबन्धे अन्यस्य कथं गौणी सादृश्यसंबन्धप्रयुक्तया लक्षणया एव गौणीत्वात् तत्रोपादानलक्षणा
यथा कुन्ताः प्रविशन्तीति यष्टीः प्रवेशयेत्यादौ अत्र कुन्तादयः स्वतोऽसंभवत्प्रवेशास्तत्सिद्धये स्वयोगिपुरुषांल्ल
क्षयंति यथा च काकेभ्यो दधि रक्ष्यतामित्यादि संग्रहस्तथोक्तं अन्ये तु नञ्जातिपदार्थवादिन उपादानलक्षणा
मेनामुदाहरंति यथा गौरनुबन्ध्य इति श्रुत्या प्रतिपादितमनुबन्धनं गोपदार्थस्य जातेर्ममकथं स्यादिति जात्या
वच्छेदकतया कथंचित्त्वान्वयसिद्धये व्यक्तिर्लक्ष्यते ननु व्यक्तिरभिधेयैव न तु लक्ष्येति चेन्न व्यक्तौ हि केवला
यामेवाभिधा जातिविशिष्टायां वा आद्ये आनन्त्यव्यभिचाराभ्यामगृहीतविशेषणान्यायेन जातावेवाभिधा व्यक्ति
प्रतीतेराक्षेपादेव संभवात् तदुक्तं विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति तदेतदपेशलं प्रयोज
नस्य रूढेर्वा मृगणीयस्य लक्षणाहेतोरभावात् जातिव्यक्तिपदार्थयोर्दासीन्ये न हि लोकप्रसिद्धिमाश्रित्य किंविचा लि॰
रः कथं तर्हि भट्टमते व्यक्तिप्रतीतिः जात्या व्यक्तेराक्षेपात् व्यक्तिं विना तस्या अविनाभावात् यथा क्रियया नामि

का० प्र० ९ 10

त्यत्र क्रियान्तरे कर्तुः ऊर्विस्यत्र कर्मणः अपरे तु पीनो देवदत्तो दिवा न भुंक्ते इति स्वव्यार्थसादायैव नलक्ष
णोपादानलक्षणेयमित्याहुः तच्चासमञ्जसं शब्दाध्याहारनये श्रुतार्थापत्तेः अर्थाध्याहारनये दृष्टार्थाप
त्तेरेव रात्रिभोजनप्रत्यये लक्षणानङ्गीकारात् लक्षणलक्षणायां तु गंगायां घोष इत्यादौ अत्र तटादेर्घोषा
धिकरणत्वसिद्धये गंगादिशब्दाः स्वार्थं समर्पयन्ति स्वार्थं परित्यजन्त्येव वर्तन्ते उभयरूपा चेयं सदाह्नता॰
शुद्धा न तु गौणी उपाचारमिश्रा हि गौणीत्युच्यते उपचारश्च सादृश्यसंबंधेन प्रवृत्तिः सादृश्यातिशयमहि
म्ना भिन्नयोर्भेदप्रतीतिस्थगनं वा नचोभयोस्तत्संबंधः केचित्तु न राचक्षते उपचारमिश्रत्वं न शुद्धायामि॰
श्रान्तो भेदकं किं तु तटउपादानलक्षणलक्षणयोरेव लक्षणलक्षणायां हि स्वार्थपरित्यागरूपं तटस्थत्वं
नोपादानलक्षणायां स्वात् परित्यागात् स्वत्वं न तु लक्षकस्य स्वार्थस्य लक्ष्यस्य च भेदप्रतीतिः तथा हि गौर्वा
हीको गौरयमित्यादौ भेदेऽपि शकललक्ष्ययोरभेदः प्रतीयते न तु गंगायां घोष इत्यादौ तत्र भेदमात्रप्रतीतेरि
ति केचिदित्यन्वयः अत्र तु गंगायां घोषः यष्टीः प्रवेशयेत्यनयोः तत्शुद्धा गौणीः एव परस्परभेदहेतु॰
स्तटस्थत्वं गंगायामित्यत्र तत्सत्वात् यष्टीरित्यत्र तदभावादिति मन्यन्ते तदुभयमप्यसत् शक्तिर्हि गंगादि
पदैस्तीरार्थप्रतिपादने गंगादिनिष्ठपावनत्वादिरूपप्रतिपिपादयिषितभेदहेतुः न तटस्थत्वं प्रयोजनप्र
त्ययः न च गंगात्वादिप्रतीतिरेव बीजं न तु तीरत्वादिप्रतीतिरेव तीरे घोष इत्यत्रापि तत्प्रतीतिप्रसंगात् अथ
गंगाशब्देन तटप्रतिपादने गंगासंबंधस्तत्र प्रतीयते तदेव तद्बीजमिति चेन्न एवं हि गंगातटे घोष इति मु॰

ख्यशब्दप्रयोगेपि न त्वप्रतीतिः स्यात् पवनत्वादिप्रतीति नन्वसंबंधप्रतीतौ विशेषाभावात् अथ वा ये जागरू-
के कथं गंगाशब्दादिभिः गंगात्वादिकं तीरे बोध्यते इति चेत् उच्यते शब्देन लक्ष्यार्थे प्रतिपादिते तत्र मुख्याभे-
दो व्यंजनया प्रतिपाद्यते न हेतुत्कं न तटादीनां गंगादिशब्दैः प्रतिपादनेन तत्प्रतिपन्नो प्रतिपिपादयिषि-
तप्रयोजनसंप्रत्यय इति मुख्यप्रतिपादन इति सति सन्नम्याप्रत्ययस्यानंतर्यं बोध्यते न च व्यंजने बाधः प्र-
तिबंधक इति काव्यविदां पंथाः वक्ष्यति हि सारोपासाध्यवसानयोर्गौण्यां भेदेप्यभेदावगमः सर्वथैवाभेदः
प्रतीतिस्तु फलमिति किं बहुना वादिनपवपावनत्वादिविशेषस्तटादौ प्रतीयते यत्तु त्रयिष्यति योगः
फलेन नो इति नन्वेवं कथं गौण्यामेवाभेदप्रयोजनं वक्ष्यति शुद्धभेदयोस्तु प्रयोजनांतरमिति चेन्न गौण्या
तन्मात्रस्य प्रयोजनत्वात् शुद्धभेदयोस्तु मुख्यस्य प्रयोजनांतरस्यापि भावात् ननु शुद्धायामभेदप्रत्यय
स्याभावात् इति संक्षेपः गौणीभेदौ लक्षयन्नेव विभजते सारोपान्यानु यत्रोक्तौ विषयी विषयस्तथा अन्यात्र
र्योक्तौ गौणी आरोपाध्यवसानाभ्यामेव भिद्यते न तु रूपादानलक्षणाभ्यामिति नु शब्दार्थः विषयी आरोप्यमाणो गवादिः
विषय आरोपस्य वाहीकादिस्तु यत्र तथा अनपह्नुतभेदौ सामानाधिकरण्येनोक्तौ शब्दप्रतिपाद्यौ सा लक्ष-
णा सारोपा विषयविषयिणोर्भेदेनोपन्यासस्यारोपपादर्थत्वात् विषय्यंतःकृतेन्यस्मिन् सा स्यात्साध्यवसा-
निका विषयिणारोप्यमानेनान्यस्मिन्नारोपविषये अंतःकृते निगीर्णे भेदेनानुपस्थापित इति यावत् विष-
यिमात्रं यत्र निर्दिश्यते ननु विषयोपि सा साध्यवसाना विषयिना विषयातिरोभावस्यात्राध्यवसानपदार्थः

का॰ प्र॰ ॥ ॥

त्वात् एतौ भेदौ शुद्धाभेदेपि भवत इति प्रतिपादयन्नेव शुद्धाया गौण्याश्च लक्षणमाह भेदाविमौ च सादृ-
श्यात्संबंधान्तरतस्तथा गौणौ शुद्धौ विज्ञेयौ इमावारोपाध्यवसानरूपौ भेदौ यदि सादृश्यसंबंधात्तदा गौ-
णौ अथ संबंधान्तरात्तदा शुद्धौ तत्र सादृश्याद्यथा गौर्वाहीक इति सारोपः गौरयमिति साध्यवसानः यद्य-
पि वाहीकस्य वाहीकत्वेनेदंतया वोपस्थितौ सारोपत्वमेवोचितं तथापीदंत्वस्यारोप्यविशेषणतया तदु-
दाहरणे द्रष्टव्यं अत एवावसाने अनिश्चयरूपसंकरावसरो नयनानंददायीन्दोर्बिम्बमेतत्प्रसीदति इत्येत-
दिति बिम्बविशेषणतया किमियमिति शंकोक्तिः किं वा एतदिति वक्तुं निर्दिश्य बिम्बमित्यारोपाद्रूपक-
मिति अत्र केचित् गोशब्दस्य मुख्येन गोत्वं प्रवृत्तिनिमित्तं लक्षणया तु गोशब्दार्थगतं जाड्यमांद्यादि तथा
भवतीति गोशब्देन जडत्वेन रूपेण वाहीको लक्ष्यते तदयुक्तं अशक्यस्याशक्यवृत्तेश्च धर्मस्य प्रवृत्तिनिमि-
त्तत्वात् शक्यत्वे शक्यवृत्तित्वे स्वाभिन्नशक्यानधिकरणस्य तत्त्वात् अपरे तु गवादिशब्देन वाहीकादिः
प्रतिपाद्यते किंतु गवादिगतस्य जाड्यादिगुणस्याभिन्नतया वाहीकादिगता जाड्यादयो गुणा एव लक्ष्यन्ते
इत्याहुः तदप्यसम्यक् गौर्वाहीक इत्यादिसामानाधिकरण्यानुपपत्तेः इदं पुनरत्र तत्त्वं साधारणं जाड्य-
मांद्यादि लक्ष्यतावच्छेदकतामाश्रित्य वाहीकादिर्लक्ष्यत इति तेन जडो वाहीक इति वाक्यार्थो भवति तदुक्तम-
न्यत्र अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति लक्ष्यमाण-
गुणैरिति लक्ष्यमाणा ये गुणा जाड्यादयस्तैरेव यदि योगः शक्यसंबंधस्तदा गौणी वृत्तिरिति अविनाभाव-

॥

सुसंबंधमात्रमभिमतं न व्याप्तिः संबाः क्रोशं नीत्यादौ तदाभावात् दृशाविशेषविशिष्टस्य तत्रापि सत्त्वेवे-
त्तिचेत् तर्ह्यारोपादेव व्यापकप्रतीतिरस्तु किं लक्षणयेत्यत आह गौरनुबंध्य इत्यत्र संबंधांतरात्सादृश्यादेर्यथा आ-
श्रयणमिति साध्यवसानो यथा आयुरेवेदमिति एवमादौ सादृश्यादन्योऽयः कार्यकारणभावादिसंबं-
धस्तत्रैवैके सारोपाध्यवसाने अत्र गौणाभेदे सारोपे भेदेपि ताद्रूप्यप्रतीतिः साध्यवसाने सर्वथैवाभेदा-
वगमः प्रयोजनं शुद्धभेदे सारोपेऽन्यवैलक्षण्येन कार्यकारित्वादेः साध्यवसाने त्वव्यभिचारेण कार्यका-
त्वादेः प्रतीतिः फलं तदुभयं वाभेदप्रतीतिः एवमित्यतः क्वचित्तयोस्तत्त्वेनोपचारः यथेंद्रार्था स्थू-
णा इंद्रः क्वचित्स्वस्वामिभावात् यथा राजकीयः पुरुषो राजा क्वचिदवयवावयविभावाद्यथा कर-
धारयेऽग्रहस्त इत्यत्रावयवेऽग्रमात्रे हस्तोपचारः क्वचित्तदीयकर्मशालित्वाद्यथा अतक्षा तक्षा लक्ष-
णानेन षड्विधा उपादानलक्षणारूपभेदाभ्यां सह रूढिप्रयोजनाभ्यां भेदे संभवमपि तन्नेति विभाजकत्वे-
नोक्तं किंतु हेतुत्वेनेति न तत्कृतो भेदो गणितः अत एव च पश्चाद्व्यंग्येन रहितेत्यादिना तत्कृतं भेदं द-
र्शयिष्यति अन्यथा पुनरुक्तिप्रसंगात् एवं च यथोक्तव्याख्यानेन षड्विधत्वे निर्व्यूढे यत् षड्विधेति रूढिप्रयो-
जनोपादानलक्षणारोपाध्यवसानरूपैः षड्भिरुपाधिभिः कल्पिताविधाः प्रकारा यस्यामिति षड्वि-
धेति चंडीदासव्याख्यानं तत्र शुद्धैव सा द्विधा सारोपान्याविति एवं तु ग्राह्ययोरनालोचनविजृंभित-
त्वादनादेयं एवं सारोपादिकृतं प्रकारषट्कं प्रतिपाद्य व्यंजनकृतं प्रकारत्रयमाह व्यंग्येन रहिता रूढौ

का॰ सहितात् प्रयोजने लक्षणोन्मुप्रवर्त्तते ननु प्रयोजनस्थले कथं व्यंग्यताहि स्यान्नियम इति चेत् प्रयोज-
प्र॰ नस्य व्यंजनमात्रगम्यत्वात् तदिदमुक्तं प्रयोजनं हि व्यंजनाव्यापारगम्यमेवेति यत्तु ननु लक्ष्यप्रयो-
१२ जनयोर्द्वयोरपि लक्षणयैव प्रतीतौ किमत्र व्यंजनयेत्यत आह प्रयोजनं हीति तत्फक्किकावतार-
12 णं तदज्ञानविजृंभितं अत्र व्यंजनस्यानस्याप्रस्तुतत्वात् तत्प्रकरणे न च व्यंजनात्रापराक्रियेति स्फु-
टेनैव प्रतिपादनात् तस्यागूढमगूढं वा तदिति व्यंग्यं लक्षणभेदप्रयोजक आरोपादियप्याभिधत्ते न
यानप्रयोजकं व्यंग्यमपीति चशब्दस्यार्थः वाशब्दः समुच्चये काव्यभावनापरिपक्वबुद्धि सहृदयः
तन्मात्रवेद्यं गूढं तदितरवेद्यमगूढं तत्र गूढं यथा मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समु-
च्छलितविभ्रमा गतिरपास्तसंस्था मतिः उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं बतेन्दुवदनातनौ तरुणि-
मोद्गमो मोदते अत्र विकासः पुष्पधर्मः स्मिते औ अत्र उपपत्र इति प्रभृतत्वं लक्षयता विकासितपदेन ता-
लोकोत्तररमणीयतातिशयो व्यज्यते स च गूढः एवं वशितसमुच्छलितापास्तसंस्थामुकुलितोद्धु-
रमोदतेशब्दैः आयत्तत्वोल्लसितत्वानेकविषयसंचरितत्वोद्भिन्नत्वयोग्यत्वाभियंत्रितत्वानि लक्षयद्भि-
र्धन्यानुरागित्वसकलवशीकारित्वानुरागातिशयालिंगनयोग्यत्वरमणीयत्वस्पृहणीयत्वानि गू-
ढानि व्यज्यन्ते यथा वा मम चकोरीपालितं मलिनयति दृग्भंगी सहि माहिमाशोर है तं कवलयति
वक्त्रं स्तगदृशः तमोवैरस्यानिस्थगयति कचः किंच वचनं कहूकण्ठीकण्ठध्वनिमपुरिमाणं ति-

यति अत्र क्रियापदानामात्यंतिकविदग्धायत्वादीनि व्यंग्यानि अगूढं यथा श्रीपरिचयाज्जडा अपि भवंत्य-
भिज्ञा विदग्धचरितानां उपदिशति कामिनीनां यौवनमद एव ललितानि अत्रोपदेशकत्वं शब्दविशे-
षप्रवक्तृत्वमदेऽनुपपन्नमत्याविष्करणं लक्षयात् उपदिशतिपदेनानायासेन शिक्षादानमभिव्यज्य-
ते तच्च सहृदयासहृदययोरपि अभिधेयवत्प्रकाशते तदेषा कथिता त्रिधा तत्र स्याद्विधाऽव्यंग्यगू-
ढव्यंग्या चेति एवं लक्षणां निरूप्य तयालाक्षणिकं लक्षयति तद्भूर्लाक्षणिकः स्याद्वाचक इति सूत्रस्थः
शब्दस्यानुषज्यते तद्भूर्लस्या लक्षणाया आश्रयः अथ व्यंजकशब्दलक्षणाय व्यंजनानिरूपणीयासा
वद्द्वेधा शब्दनिष्ठार्थनिष्ठा च तत्रांत्या शब्दलक्षणेऽनुपयुक्तत्वादग्रे विवेचनीयता याद्यद्विधा अभिधामूला-
लक्षणामूला च अत्र यद्यप्यभिधायाः प्राथम्यादुपजीव्यत्वाच्च तन्मूलामप्रथमं निरूपयितुमुचितानथा-
पि स्वप्रसिद्धत्वाल्लक्षणायाः प्रकृतत्वाच्च तन्मूलामेव प्रथमं निरूपयति तद्व्यंजनात्मकः तद्भूर्लाक्षि
णिकशब्दे व्यापारो व्यंग्यप्रकाशनानुकूलः तत्र लक्षणादिनैरेव तस्य नीतौ किं तयेत्यत आह यस्यप्रतीतिमा-
दातुं लक्षणा समुपास्यते फले शब्दैकगम्ये अत्र व्यंजनान्नापरा क्रिया यस्य पावनत्वादेः फलस्य प्रतीतये
लक्षणाश्रय शब्दप्रयोगः तत्फलं तस्मादेव गम्यते तत्तु प्रमाणांतरात् व्याप्तिस्मादेरनपेक्षणात्
न च तत्र शब्दस्य व्यंजनां विना अन्यो व्यापारः तथाहि नाभिधा समयाभावात् पावनत्वादौ फले संकेतग्र-
हाभावादभिधा हि संकेतग्रह सहायैवोपयुज्यते तेन स्वरूपमतीतिवद्दस्यते हेत्वभावान्न लक्षणा मुख्या

का॰
प्र॰
१२
13

र्थबाधस्तद्योगो रूढिप्रयोजनान्यतरदिति त्रयं लक्षणाहेतुः तदभावमेवोपपादयति लक्ष्यं न मु
ख्यं नाप्यत्र बाधायोगः फलेन नो न प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः यथा गंगाशब्दस्य तीरं
मुख्योऽर्थः न त्र बाधः तीरे च संबंधः तीरस्य च लक्षणयोपस्थापने स्वशब्देन प्रतिपादयितुमशक्य
स्य पावनत्वादेः प्रतीतिश्च प्रयोजनमिति गंगाशब्देन तीरं लक्ष्यते न हि यदि तटमपि मुख्यं स्यात्तत्र बाधः
स्यात् प्रयोजनस्य गंगादिगतपावनत्वादिविशेषस्य तटेन संबंधः स्यात् लक्षणया प्रयोजनप्रतिपा
दनस्य प्रयोजनान्तरसंभवात् तद्वा गंगाशब्दः प्रयोजनं लक्षयेत् न चैतदेकमप्यत्रेत्यर्थः न केव
लं मुख्यार्थबाधादीनामभावमात्रं किं तु तेषामपेक्षापि नेत्याह न च शब्दः स्खलद्गतिः इति मुख्या
र्थबाधादित्रयमपेक्ष्य बोधकत्वं स्खलद्गतित्वं एवं नापि गंगाशब्दस्तटमिव प्रयोजनं प्रयोजनप्रयोजनं
प्रतिपादयितुमसमर्थ इत्यादिवृत्तौ बाधाधार्मिकमनपेक्षेति शेषो द्रष्टव्यः समर्थ इति पाठे तु बाधा
दित्रयमपेक्षैवेति दोषः ननु स्वस्ति प्रयोजने लक्ष्ये प्रयोजनान्तरमिति वैयात्याद्यदि ब्रूयात्तत्राह एवम
प्यनवस्था या मूलक्षतिकारिणी मूलप्रकृतार्थप्रतीतिः ननु पावनत्वादिविशिष्टमेव लक्ष्यतामिति
किं व्यंजनया न चैवं प्रयोजनस्यापि लक्षणिकोपदेशाल्लक्षणप्रयोजनं नास्तीति वाच्यं गंगातटे घोष
इत्यतोऽधिकार्थस्य पावनत्वादिविशिष्टस्य प्रतीतेरेव प्रयोजनत्वादित्यत आह प्रयोजनेन सहितं
लक्षणीयं न युज्यते कुत इत्याकांक्षायामाह ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतं ननु विषय

फलयोर्भेदः सत्याम् उक्तः फलत्वं हि जन्यत्वं जन्यप्रतीतिविषयत्वं वा आद्ये पावनत्वादौ तदभावः तज्ज्ञा
नेच विषयाद्भेदः एवं चैते प्रत्यक्षादे नीलादिविषयफलं तु प्रकटता संवित्तिर्वेति द्वितीये विशेषप्रकटता
ज्ञानस्य प्रमत्वज्जन्यताभावात् न च जन्यज्ञाप्यसाधारणमेकं साध्यत्वमस्तीति अत्र ब्रूमः ज्ञानस्य ज
नकीभूतो विषयोपघाताज्ज्ञानादन्यस्तथा फलमपि न स्वस्वने भिन्नत्वं कारणस्येव कार्यस्यापि भिन्नकाल
त्वनियमात् शैत्यादौ तु क्वचित्फलसोपचारिकं द्रष्टव्यं तथा चलद्दुःमानमेव यदि शैत्यज्ञानं तदा प्रयोज
नेन स्यादित्यर्थः ननु लक्ष्यप्रतीतेर्नशैत्यप्रतीतिफलं किंतु शक्यसंबंधरूपलक्षणायाः तथा न किंचि
द्दूषणमिति तत्राहुः अन्वयानुपपत्त्यालक्षणाप्रसरंती यावदन्वयोपपादकं तावदेव विषयीकरो
ति न त्वन्वयानुपपादकमपीति कथं तटे पावनत्वमपि विषयीकुर्यात् नन्वयानुपपत्त्याकल्प्यमाना
पि सा तु दृष्टमपि शैत्यं विषयीकरोति यथा तापोपशमायोपादीयमानं शैत्यमपि जनयतीति चेन्न
वेदनस्य हि सन्निधिमात्रेणैव शैत्यजनकत्वं लक्षणायास्त्वनुपपत्तिप्रसारितयेति वैषम्यात् यत्तू
क्तं यथा कन्नेपि चण्डीदासेन ज्ञानस्य विषयातिरिक्तफलमात्रं वा विवक्षितं ज्ञेयगतं वा आद्ये प्रकृते
व्याप्तिगोस्वामिप्रतीतिः अंत्ये प्रयोजनज्ञानएवव्यभिचारः तेन हि गोस्वामिसंतोषमात्रं जन्यते न तु म
हृतं किंचिदिति तस्मादेह नु फलयोस्तटप्रतीतिफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्व
मसमीचीनमेवेति व्यंजनासिद्धिरित्यत्र तात्पर्यमिति तदेवोपविजृंभितं न हि तेन सूत्रेण यथा

क्तेनापि ज्ञानत्वस्य विषयान्यफलकत्वव्याप्यत्वं प्रतिपाद्यते किंतु ज्ञानफलत्वस्य विषयान्यत्वव्या-
प्यत्वं तथा च शैत्यादेर्लक्षणजन्यप्रतीतिविषयत्वे तत्प्रयोजनत्वं न स्यादित्यर्थे दोषानवकाशः वयं
तु ब्रूमः विशिष्टं लक्ष्यं तत्तदा भवेद्यदि विशिष्टत्वं लक्षणावच्छेदके पूर्वं प्रतीतं संभवेत् न त्वेवं पा-
वनत्वादिविशेषवैशिष्ट्यस्य तटे प्रमाणान्तरागोचरत्वात् तत्र तस्याभावात् यदुक्तवान्योगफलेन नो
इति अथ पावनत्वादिसामान्यवैशिष्ट्यमेव लक्षणावच्छेदकमस्तु तस्य प्रतीतत्वादिति चेत्तर्हि पावन
त्वादिविशेषो न प्रतीयेतेति किं बहुना गौर्वाहीक इत्यत्र गवाभिन्नजडस्य लक्षत्वे सावेवान्वयानुपपत्तिः
उपसंहरति विशिष्टे लक्षणा नैवं एवमुक्तयुक्त्या कथं तर्हि तत्प्रतीतिरित्यत आह विशेषाः स्युस्तु
लक्षिते तटादौ लक्षिते तु सति पावनत्वादयो विशेषाः प्रतीतिविषयाः स्युः ते च प्रसिद्धातिरिक्तव्यापा
रगम्या एव स च व्यापारो व्यंजनध्वननादिशब्दवाच्योऽवश्यमेषितव्यः कथमन्यथा विशेषप्रतिपत्ति
रिति एवं लक्षणामूलव्यंजकत्वमुक्तं अभिधामूलत्वाह अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते संयो
गाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं अनेकार्थस्य शब्दस्य वाचकत्वे संयोगादिना नियंत्रिते सति अवाच्यार्थधी
हेतुर्व्यापारोंजनं व्यंजनमित्यर्थः अनेकार्थो नेकार्थाभिधानशक्तः अर्थभेदेन शब्दभेद इति नयेन तु अर्थान्तरा
भिधानशक्तः शब्दस्तदन्यः तदभेदभ्रमविषयो वा वाचकत्वमभिधा अवाच्यार्थस्तदभिधाव्यापाराविष
यः नियंत्रणं नियमनं एकतरमात्रस्मरणानुकूलत्वं यदाहुः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव

इति एतेन नियमनमेवार्थे नास्ति नैवार्थे वक्तुस्तात्पर्यमिति तात्पर्य इत्यवोचाप्रलापः संयोगाद्यैरित्या॰
द्यपदग्राह्यं विप्रयोगादि यदुक्तमभियुक्तैः संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं लिं
गं शब्दस्यान्यस्य संनिधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेष
स्मृतिहेतवः तत्र संयोगप्रसिद्धार्थगुणविशेषसंबंधरूपः तेनाभिधानियमनं यथा शंखचक्रो हरि॰
रित्यत्र शंखचक्रादिसंयोगेनानेकार्थस्य हरिशब्दस्याच्युते अभिधा नियम्यते अन्यहरिपदस्य न तत्संयोगाभावात्
विप्रयोगस्तादृशसंबंधध्वंसः तेन यथा अशंखचक्रो हरिरित्यच्युते ध्वंसस्य प्रतियोगिपूर्वकत्वात् साहचर्यं
सहचरता तेन यथा रामलक्ष्मणाविति रामलक्ष्मणसाहचर्येण दाशरथ्यो विरोधः सहानवस्थानं वध्यघा
तकभावश्च तेन यथा छायातपाविति कांतिरित्यावो शक्तत्वेपि छायापदस्यातपाभावे विरोधिनोः कयोश्चिदुप
मायां रामार्जुनगतिस्तयोरित्यत्र रामार्जुनपदयोर्भार्गवकार्तवीर्ययोः अर्थः प्रयोजनं तेन यथा स्थाणुं भजे भ
वच्छिदे इत्यत्र भवच्छेदनप्रयोजनवशात् स्थाणुशब्दस्य हरे प्रकरणं वक्तृश्रोतृबुद्धिस्थता तेन यथा
सर्वं जानाति देव इत्यत्र देवशब्दस्य राज्ञि यत्तु युष्मदर्थव्याख्यानस्याप्रपि प्रकृते राजादेर्विमर्शः किंवा
संबोध्यो राजादाविमर्शः संबोध्यस्यैव युष्मदर्थत्वात् लिंगं संयोगातिरिक्तसंबंधेन परिपलव्याद्वृत्तो धर्मः
तेन यथा कुपितो मकरध्वज इत्यत्र मकरध्वजसमुद्राभ्यामावृत्तेन समवायसंबंधवता कोपेन म॰
करध्वजशब्दः कामे यत्तु लिंगं चिह्नमिति तन्न कोपस्य कामचिह्नत्वाभावात् असाधारणधर्मस्य चि॰

का॰ प्र॰ १५ 15

कृतवान् सशंखचक्र इत्यत्रातिव्याप्तिप्रसंगाच्च शब्दस्यान्यस्य संनिधिः नियमार्थकस्तर्हि नरसामाना-
धिकरण्यं प्रतीभवाच्छिद इत्यादावप्रसंगः नच शंखचक्रो हरिरित्यत्रातिप्रसंगः शंखचक्रशब्दसा-
सामानाधिकरण्याभावात् यद्वा हरौ शंखचक्रशब्दसामानाधिकरण्याभावात् यद्वा हरौ शंखचक्रे
इति संयोगोदाहरणे तात्पर्यं तेन यथा देवस्य त्रिपुरारातेरित्यत्र त्रिपुरारातीति शब्दसामानाधिकरण्या-
त् देवशब्दस्य शंभुरूपे अपरे अत्र ते देवशब्दार्थस्य राज्ञः त्रिपुरारातित्वाभावात् यत्र देवतान्तरस्य तथा-
भावात् शंभौ शक्तिनियमन इति तत्र प्रकृते देवतान्तरे देवच शक्तिभेदाभावादुदाहरणासामंजस्या-
नुपपत्तेः सामर्थ्यं कारणत्वं तेन यथा मधुना मत्तः कोकिलः इत्यत्र मधुशब्दस्य वसंते अन्यस्य मधुश-
ब्दार्थस्य कोकिलमादनासामर्थ्यात् औचिती उचितता तया यथा पातु वो दयितामुखमित्यत्रोत्कण्ठित-
स्य मनोरथस्य साधनोचितत्वेन मुखशब्दस्य साम्मुख्येन रूपाद्यादौ यद्यप्यत्रापि सामर्थ्यं संभवत्येव तथापि मधु-
नेत्यत्र प्रतीयत एव न तथौचित्याभावयोः उचितीमात्रज्ञानादेव शक्तिनियमनसंकीर्णमिति देशेन यथा भा-
त्यत्र परमेश्वर इति अत्र अत्रेति राजधानीरूपाद्देशात् परमेश्वरशब्दस्य राजनि कालेन यथा चित्रभानुर्वि-
भातीत्यत्र चित्रभानुपदस्य दिवा दिवाकरे रात्र्यामाशुशुक्षणौ व्यक्तिलिंगं पुंस्त्वादि तया यथा मित्रं
भातीति अत्र नपुंसकरूपाल्लिंगात् मित्रपदस्य सुहृदि मित्रो भातीत्यत्र मित्रशब्दस्य पुंलिंगात्सूर्ये स्वर-
स्य उदात्तादिः वेदे वाक्कृत्स्नेनार्थप्रतीतिकृदिष्यते यथा इंद्रशत्रुर्वर्धस्वेति अत्र इन्द्रशत्रोरित्यस्यानोदा-

१५

नत्वेवं द्वस्य शानयिनेति षष्ठीतत्पुरुषव्यक्त्याव्यंग्यस्य शानतकर्मत्वं लभ्यते काव्येतु नैवं बाहुल्यं उदात्तानुदात्ता
दिरूपस्वरेणाहि काव्ये र्थविशेषावगता श्लेषाभंगप्रसंगात् अत एव श्लेषप्रस्तावप्रसंगे वक्ष्यति काव्यमार्गे न
स्वरो गण्यत इत्यादि ननु हृष्टे प्रसीदेत्यादौ स्वरेण संबोधनं प्रकाश्यते न चार्थविशेषेभिधानियम्यते न तु सा
ह्लात्स्वरेणैव काकुस्थलेनु नानार्थाभिधानियमनं किं तु यदार्थस्यैव व्यंजनं यद्वा स्वरशब्देनोदात्तादित्रयं
विवक्षितं अतः काव्ये स्वरस्याभिधानियामकत्वं नास्त्येवेति व्यर्थं बाहुल्येनेति विशेषणमिति सैवं तथा कर
स्थहृद्यंकं द्य पंकजवैरिणीत्यादावि द्रशत्रुरितिन्यायेनाभिधानियमनस्य काव्येपि दर्शितत्वात् स्वरादय इत्या
दिग्रहणाद् अभिनयापदेशौ गृह्येते अन्येचोक्तान्तर्भूताः अभिनयश्च हस्तादिवा स्थाकारादिप्रदर्शिका हस्ता
दिक्रिया तया यथा एतद्दृहमेतन्यनि अत्र एतन्महमेत्नेहिसक्रियते हि एतद्दृहमेत्तावत्या एतद्दृहमेन्नेहि दि अत्रैह्रि
अत्र विकसितमुकुलिताभिनयविशेषविशेषितसाहित्येनस्तनस्पर्शत्वमुकुलितत्वार्थविशेषेभिधानियम्य
ते एवं शेषपादत्रयेपि अपदेशो अभिमतनिर्देशः तेन यथा इतः स दैत्यः प्राप्तश्रीनीत एवाहतित्वयमिति
अत्रापदेशेन इदं शब्दस्याभिधावृत्तिर्नियम्यते इत्थं संयोगादिनानार्थाभिधायकत्वे निवारितेपि यदनेकार्थ
शब्देन कस्यचिदर्थान्तरस्य प्रतिपादनं तत्र नाभिधाशब्दस्य व्यापारः नियमनात्तस्याः नापि लक्षणा मुख्यार्थबाधादि
विरहात् किं तु व्यंजनं व्यंजनव्यापारः यथा भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसं
ग्रहस्य यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोभूत् अत्र प्रकरणेन भद्रात्मन

का॰ प्र॰ १९ 16

इत्यादिपदानां शक्तिस्तदन्वययोग्येचार्थेऽभिधानियंत्रणापि गजस्य तदनुपपत्त्यस्य स्ववाच्यस्य व्यंजनवैव प्र
तीतिनंतनुपमानोपमेयभावकल्पनाविरहात् शब्दश्लेषतोभेदेपियोसहृत्पर गोत्राणामित्यायपर्थश्लेषतः
उक्तोस्य भेदः अर्थश्लेषस्तु उभयत्रशक्तिरेवनव्यंजनेतिचेति उच्यते यत्रोभयोरर्थयोस्तात्पर्यं सश्लेषः
यत्र त्वेकस्मिन्नेव तत्र सामग्रीमहिम्नानुद्दिष्टीयात् प्रतीतिः सा व्यंजनेति एवं व्यंजनां निरूप्य तया
शब्दं लक्षयति तद्युक्तो व्यंजकशब्दः व्यंजनमिति प्रस्तुतेप्यर्थगत्या तच्छब्देन व्यंजनं परामृश्यते तेन व्यं
ग्यंतद्युक्तो व्यंजकः संपद्यते अन्यथा जनयुक्तो जनकस्यात् न देतदुक्तं व्यंजनयुक्तो व्यंजनयुक्तः ननु
उक्तस्थलेऽर्थस्यापि व्यंजकत्वे कथं शाब्दीयं गलरूपस्य काव्यस्य ध्वनित्वं स्यात् इत्यत आह यत्सोऽर्थोन्तरयु
क्तया अर्थोपि व्यंजकस्तत्र सहकारितया मतः सइति शब्दः तथा व्यंजकः इतिश्रीगोविन्दठक्कुरकृ
ते काव्यप्रदीपे काव्यशरीरभूतशब्दार्थविभागो द्वितीयउल्लासः २ एवं शब्दे निरूपिते उपोद्घातेन शब्द
व्यंजनायां निरूपितायां प्रसंगे नार्थव्यंजना निरूपणीया तत्र तदाशंके तच्छब्दे निरूपिते ऽवसरोयमर्थ
निरूपणस्य किंचार्थधर्मिणि निरूपिते तद्धर्मव्यंजनापि सुनिरूपा भवतीत्यत आह तस्यार्थस्य व्यं
जनानिरूपणमिति तद्देशं कामं पतिनिरीक्षुरुक्तं स्मारयति अर्थाः प्रोक्ताः पुरा तेषां अर्था वाच्यलक्ष्यव्यंग्याः
अर्थस्य सन्निहितनरस्येति तेषामिमनेन योगपदं याः वाचकादयः शब्दाः परामृश्यन्ते शिष्यावधानाय प्रति
जानीते अर्थव्यंजकतोच्यते ननु सर्वेषामित्यादिना एवं मध्यानां व्यंजकता पूर्वोक्तैव न तत्कथमीदृशी मेता

१९

कोल्लायामाह वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां यो॰
र्थधीहेतुर्व्यापारो व्यक्तिरेव सा बोधव्यः प्रतिपादनीयो जनः अन्तर्भावित एवार्थत्वात् अतो न वाच्येनाभेदः का-
कुः शोकभीत्यादिभिः ध्वनिविकारः वाच्यवाक्याभ्यां सहितोऽन्यसंनिधिः वाक्यवाच्यान्यसंनिधिः अतो न द्वं-
द्वैकवद्भावेन पुंसकत्वप्रसंगः प्रस्तावः प्रकरणं वैशिष्ट्यं वैलक्षण्यं तच्च वक्त्रादीषु प्रत्येकमभिसम्बध्य-
ते अमोऽर्थो वाच्यलक्ष्यातिरिक्तः व्यक्तिर्व्यञ्जनाकरणव्युत्पत्तेः अर्थस्य त्रिविधस्यापि ननु कस्यचिदेव प्रति-
भाजुषामित्यनेन नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा या वासनेत्युच्यते तस्याः सत्त्वमेव वक्तृवैशिष्ट्यादि॰
सत्त्वेऽपि व्यङ्ग्यप्रतीतिरिति प्रतिपादितं अत एव वैयाकरणानां न तथार्थप्रतीति तथा चोक्तं सवासनानां
नाट्यादौ रसस्यानुभवो भवेत् निर्वासनास्तु रङ्गान्तर्वेश्मकुड्याश्मसन्निभाः यथाक्रममुदाहरणानि अइ॰
पिहुलं जलकुंभं घेत्तूण समागदम्हि सहि तुरियं समसेअसलिलणीसासणीसहा वीसमामि खणं अत्र च
क्रीकामिनीतस्याङ्गः शीलत्वरूपवैशिष्ट्यविज्ञानतां चौर्यरतगोपनं व्यक्तीभवति ओण्णिद्दं दोब्बल्लं चिंता
अलसत्तणं सणीससियं मह मंदभाइणीये केरं सहि तुह वि अहह परिहवई अत्र दूती प्रतिपाद्या तस्या अ॰
न्यदापि दुष्टचेष्टया वैशिष्ट्येन कामुकोपभोगो व्यज्यते अत्रान्यदीयसन्निद्रादिकमन्यत्र वापि तस्मिन्निति तत्स-
दृशासंनिकृष्टता हि लक्ष्यत इति केचित् तदयोग्यं तत्सखीत्वादीयोऽभिद्रुतान्वयस्यावाक्यार्थत्वात् तथाभूतां दृ-
ष्ट्वा नृपसदसि पाञ्चालतनयां वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः विराटस्यावासे स्थितमनुचि-

का॰ नारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु अत्र खेदो मात्सर्यं अत्र खेदं मयि भजति नाद्या
प्र॰ पि कुरुष्विति काकुवैशिष्ट्यात् मयि न योग्यं कुरुषु तु योग्यं मात्सर्यमिति व्यज्यते ननु शोकेन काकु
८ व्यंग्येन वाच्यस्यासिद्धिः शोभनत्वनिष्पत्तिः क्रियते तथा वाच्यरंग तथा व्यंग्यगुणीभूत सकलेन ध्वन्यंग
17 काकुरिति चेत् न व्यंग्यस्य कोपप्रकर्षपर्यवसन्नतया वाच्यस्यैव महत्त्वंगतत्वात् तदेतदुक्तं न च वा
च्यसिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंगत्वं शंक्यमिति तथापि काकाक्षिप्तव्यंग्यरूप गुणीभूतव्यंग्यप्रभे
दता कथमानेयेति चेत् न अत्रनेति प्रश्नकाकापि … र्थप्रतीति पर्यवसानात् यां काकुं विना वा
क्यार्थबोधपर्यवनोपपद्यते न चैतादि प्रश्न… भावात् यथा मथ्नामि कौरवशतं समरेन कोपादित्या
दौ भीमसेनाद्दोलाट शीवकुरि तदेतदुक्तं प्रश्नमात्रेणाकाकेर्विश्रान्तेरिति अन्येन कुरुषु न भजतीति
ननु काकुः किमर्थः ततः प्रश्नरूपाः किमर्थ एवाक्षिप्त इति तस्यैव गुणीभावो न्याय्यः ननु काकुमेण
पि काकाव्यंग्यो गुणीभवति न तु एव गुणीभूतविभागे काकाक्षिप्तमिति हठार्थग भीति … योगर
तिनात्पर्यमाहुः नट्… ग्राम हूगण्ड स्थलणि क्षियं दिहितोण सि श्रणाम्नो पद्धिं … ने … लासा
दिद्दी वाक्यमनेकपदं तेनात्र न चेदानीं यदात्मवाक्यवैशिष्ट्यात् सत्… कपोल … ति विम्बितोपप
तल्ले द क्षिरन्याट शीचलितायां तु तस्यास … हो प्रच्छन्नकामुकत्वं तवेति व्यज्यते तु हृ घोयं सर
सकदली श्रेणि शोभातिशायी कंजोत्कर्षाकुरितरमणी विभ्रमो नर्मदायाः किंचिचेतस्मिन्नु रम …

दत्तान्विनवांतिवानायेषामग्रेसरति कलितानाकाण्डकोयोमनोभूः अत्रनर्मदोत्यस्वरूपस्यतद्विशेष-
णोभूनवातऊजातिरूपस्यवाच्यस्ययथोक्तविशेषेणावैशिष्ट्यान्तरनार्यप्रविशेतिव्यज्यते णोल्लेश्मणुल्ल-
सणा आह्लीप्रानासंगरस्मिसअलस्लि त्वयणामेनंजरसंजयप्तेरणावाहेरवीसामो अन्यसन्निधिः सन्निहि-
तोन्यः जेतावप्रवेशिनीप्रतिप्रवर्तिनेवादेसप्रतिहृद्धमप्रकृत्स्वरूपस्यान्यस्यसंनिधेः वैशिष्ट्यात् सन्निहितप्र-
तिसंध्यासकेनसमयइतिव्यज्यते स्ववरसमागमदिनजपिवोऽञ्जपहरमन्तेण एषमेअकिन्निचिहिसि
नासहिसजेस्वकरणीज्ञ अत्रप्रकरणस्यप्रस्तावस्यअभिसारसंवेपित्वरूपवैशिष्ट्यादुपपत्तिंप्रत्यभिकि-
सर्तुंनयोग्यमितिव्यज्यते अन्यत्रयूयंऊसमावचायंकुरुध्वमत्रास्मिकोरमिसख्यः नाहंहिहरेअभितुं
समर्थाप्रसीदनायंरचितोंजलिवः अत्रदेशस्यातिविविक्तादिरूपवैशिष्ट्याद्वक्तृवैशिष्ट्यादिसहितान्य-
त्यांप्रहृद्धनकामुकोयुष्माभिः प्रहेयइतिप्रियसखीः प्रतिव्यज्यते गुरुअणपरवसपियकिंभणामितुं
हमंतंमिभायणी अहंअंयुऊपवासंवञ्जुसअमेयस्सणासिकरणीज्ञं अत्रायपदप्रतिपाद्यमधुसमयवै-
शिष्ट्याद्वक्तुरववस्याविशेषसहितादिदानींयदिव्रजसितदा अहंनजीवामि नवत्तुनजामिगतिंरतिप्रि-
यं प्रत्यनुरक्तयाव्यज्यते आदिग्रहणाच्चेष्टालीलादौ तम्रचेष्टायथा द्वारोपांतनिरंतरमयितयासौंद-
र्यसाश्रियाप्रोल्लासोरुयुगंपरस्परसमासक्तंसमादितं आनीतंपरतः शिरोंशुकमथः त्विन्नेचलेलो-
चनेवाचलस्स्वानिवारेतमसरणंसंकोचितेदोलिते अत्रारुयुगसमासंगादिचेष्टावैशिष्ट्यान्त्रहृद्धकामु-

का॰
प्र॰
१८
18

कविधानप्राकृतविशेषोधन्यते तत्रप्रथमार्थेनस्पष्टकमालिंगनंप्रोरोपकंपुगमानीतमित्यनेनगूढ
मागच्छेरिति अथ: द्वितीयचलेलोचनेवाचस्पतिनिवारितंप्रसरणमित्यनेनसूर्यास्तमयेकोलाहल
रहितेकालेसमागंतव्यमिति संकोचितेदीर्णेनेत्रस्पनेनपारितोषिकमालिंगनेकरोमीतिव्यज्यते यद्य
प्येकत्रैवोदाहरणेभेदांतराण्यपिसंतीतितदेवोदाहरणांतरंसंभवति तथापिनि:संदेहबुध्यत्रैवप्रदर्शनाव
सरतयापुन: पुनरुदाह्रियंते वक्तृबोद्धव्यादीनांप्रत्येकमेवनव्यंजकत्वंकिंतुमिलितानामपीतिद्र
ष्टव्यं तत्रद्वयोर्व्यंजकत्वंयथा अत्तापत्थणिमज्जइपत्थ अहंदिहअंपलोएहि मापहिअअरत्तिअंधय
अमेह्णपमहणिमज्जहस्ति नत्वर्थमात्रव्यंजकत्वेशाब्दार्थयुगकाव्यस्यव्यंजकत्वंनसिद्धमित्यतआह
शब्दप्रमाणवेद्योर्थोव्यनक्त्यर्थांतरंयत: अर्थस्यव्यंजकत्वेतच्छब्दस्यसहकारिता इतिश्रीमहामहोपा
ध्यायगोविंदठक्कुरकृतेकाव्यप्रदीपेअर्थव्यंजकतानिरूपणंनामतृतीयउल्लास: ३ यद्यपिकाव्यलक्षणवि
भागंचविधायलक्षणपदार्थेषुविवेचनीयेषुविशेष्यपदार्थ: शब्दार्थौविचारितौ इदानींदोषगुणालंका
राणांनिरूपणमुचितं ननुकाव्येनदस्यध्वन्यादेर्भेदनात् तथापिध्वन्यादेर्भेदेषुज्ञातेषुदोषादीनांहेयो
पादेयतयोरवगमोभवति तयोर्विशेषनिष्ठत्वात् यथाश्रुतिकटुत्वंदोषोध्वनिविशेषेशृंगारादिध्वना
हेयोपायेरौद्रादिरसध्वनावित्रभेदेपादेयएव माधुर्यादिगुण: शृंगारादावनुगुणतयोपादेयएववी
ररसध्वनौत्वनुपादेयएव अलंकारोपियमकादीरसादिध्वनावनुपादेय: चित्रभेदेतूपादेयएवत

णापि दोषादिनिरूपणे पर्य्योगिषु काव्यविशेषप्रभेदेषु निरूप्यमाणेषु प्रसंगादनुपयोगिनोपि निरूप
णीया इत्युल्लासत्रयेण काव्यभेदत्रयभेदो निरूपणीयस्तत्र प्रथमं ध्वनिभेदस्तावदुनिर्द्दिश्यते अविवक्षि
तवाच्यो विवक्षितान्यपरवाच्यश्च तत्र यद्यपि स्वाभिप्रायाः प्राधान्यात्तन्मूलको विवक्षितान्यपरवाच्य एव प्रथ
मं निर्देष्टुमुचितः तथापि लक्षणामूलव्यंजनायाः प्राङ्निरूपणात्तत्स्मृतेनन्तरमेव शब्दात्मिकेचक
मसमुद्वाय स्वीकराहस्माय एवमयम मायमुद्दिश्य विभजते अविवक्षितवाच्योयस्तत्र वाच्यं भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं वाच्यः वाच्यजात्यादिधर्माणं वर्मी अविवक्षितवाच्ये नरूपेणान्व
यशेषविषय तयानपेक्षितेयत्र सः तत्र यद्यपि विवक्षितवाच्यमात्रस्यतायां विभागः किंतु तन्महिशेष
ध्वनेः तत्तु शाब्दान्वयावगमः तथापियत्तदरेकार्थ्य तयानत्र ध्वनावितिनरुत्कृष्टस्यध्वनिभेदे यत् शा
ब्दार्थापिध्वनिरेवलभ्यते अयं च ध्वनिभेदलक्षणमूलगूढव्यंग्यप्राधान्ये सति संभवति अविवक्षितन
त्वं च वाच्यस्यान्वयानपपत्तेः साचवाच्यस्यानुपपत्त्या त्वेनउपयोगिनिरूपान्तरेणान्ययीहार्थतः एववा
च्यस्य योग्यत्वाद्धाप्रस्तुपयुक्तमपि पुनरुक्तत्वात् विशेषाभावायकत्वमात्राद्धातत्रोभयत्रापि वाच्यम
र्थान्तरे उपयोगिनिलक्षणावच्छेदके संक्रमितमाश्रयतेनपरिणामितं वाच्योप्यर्थोरूपान्तरेणलक्षणर
स्यार्थः द्वितीये तु वाच्यमत्यन्तं तिरस्कृतं न केनापिरूपेणान्वयप्रविष्टं तत्रार्थान्तरे संक्रमितवाच्ये यथ
हाग्धेयया तालाजाभांतिगुणाजालात्तनमाहि अजाहिवेर्यति २३ किरणानुगाहि याहोत्तंकमलाइ

का॰ प्र॰ १९ 19

मल्लार अत्र द्वितीयकमलशब्दः सौरभादिगुणयुक्तत्वे लक्ष्ये संक्रमितवाच्यः विशेषणाधायकत्वमात्रा
यथा त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत् अत्र वच्मीत्यनुपयु
क्तार्थं अनुपादनेऽपि वचनक्रियाप्रतीतेः अत उपदेशपरत्वे लक्ष्ये तत्र वाच्यार्थः संक्रमितः एवं त्वामस्मीति
पदेष्वनुपयुक्तार्थे संबोध्यत्वेन युष्मदर्थस्य वचनकर्मताशङ्केः यः श्रोतृउपयुक्तरूपेणैवास्मदर्थेन
कर्तृत्वप्रत्ययात् अतस्ताभ्यां द्वयोरुद्देशपराद्वावेतौ संक्रमितौ तथा आत्मीयाया एव मतेः सर्वैरप्यादाना
दनुपयुक्तत्वे नात्मीयशब्देन प्रमाणपरिगृहीतत्वे लक्ष्यमाणे तद्वाच्यं संक्रमितं अस्यमुक्तमशक्यत्वार्थग्र
हणाद्दस्मिन्योगेऽपि वच्मीत्युक्तमप्युरुषः अस्य न तिरस्कृतं यथा उपकृतं बहु तत्र किमुच्यते सुजनता प्रथि
ता भवता परं विदधदीदृशमेव सदा सखे सुखितः आस्व ततः शरदां शतं अत्रापकारिणं प्रत्ययो
ग्येष्वेषूपकृतादिपदैः स्वार्थविपरीतं लक्ष्यते न चात्र वाच्यस्य कश्चिदुपयोगः त्वय्येवमपकारेऽपि क्रिय
माणेऽपि मया प्रियमेवोच्यते इति साधुत्वं व्यंग्यं न देवोपकारापकारविवेको नास्तीति वा अयं च प्रभेदो न वि
शेषलक्षणयाः किन्त्वन्यत्रापि यथा ममैव शहूतसम्वेदकरोत्यलाया स्मिता वाणूष्मातिकूलवाचः प्रि
येविसयायां परमायतायाः पयोविरामप्रतिषेधमेव अत्र पयावित्यनेन सोत्कण्ठनिरीक्षणं व्यंग्यं उत्कण्ठा
तिशयो व्यंग्यः द्वितीयं ध्वनिभेदं कारिकाद्वाभ्यां विभजते विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ध्वनि
रिति प्रकरणाल्लभ्यते अन्यपरं व्यंग्यनिष्ठमुपसर्जनीभूतं अयं भेदोऽभिधामूलव्यंग्यप्राधान्ये सति द्रष्टव्यः एव

न्तु कष्पलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः सूचीकटाहन्यायमाश्रित्यालक्ष्यक्रमव्यंग्यस्य पूर्वमुद्देशः लक्ष्य-
स्यैकत्वात् द्वितीयस्य पंचाशद्भेदत्वात् विभावादय एव न रसः किंतु रसस्तैर्निष्पद्यत इत्याह विभावादिर-
सप्रतीतेः क्रमसन्नपि न लक्ष्य इति क्रमस्यालक्ष्यत्वात् क्रान्तभेदद्वयमित्यर्थः रसभावतदाभासभावशान्त्यादिर-
क्रमः भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः अक्रमः अलक्ष्यक्रमः न त्वक्रमेव रसभावयः परामर्शः
आदिग्रहणाद्भावोदयभावसंधिभावशबलत्वानि तत्वाभासवद्रसस्य शान्त्यादयः किं तु उक्ताः निर्वेदादय-
वस्थायित्वेऽपि प्रसमस्य निरतिशयस्य वेद्यान्तरसम्पर्कशून्यस्य तदभावात् आभासत्वं तु तिर्यगादिविषयकत्वेन त-
याविरुद्धं भिन्न इति यत्र प्रधानं रसादिस्तत्र ध्वनिः यत्र तु प्रधानं तत्रालंकार इति भावात् कारणान्यथ का-
र्याणि सहकारीणि यानि पि रसादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः विभावा अनुभावास्तत्कथ्यन्ते व्यभि-
चारिणः व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः अथेति समुच्चये कारणानि प्रमदाहृदयादीनि कार-
कोद्दीपकरूपाणि कार्याणि स्वेदस्तम्भोऽथ रोमांचः स्वरभंगोऽथ वेपथुः वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्वि-
कामताः वाङ्मनोबुद्धिशरीरारम्भरूपाणि कटाक्षभुजलेपादीनि सहकारीणि निर्वेदजनितौत्कण्ठादीनि
विभावा आलंबनोद्दीपनरूपाः चेयदेत्यर्थः तन्नेदेत्यर्थः अथ यद्युद्दीपकस्य स्थायिनि न कारणत्वं किं तत्त्व-
त्वेन तस्मिन्नीषदुत्कर्षाधायकरूपमुद्दीपकत्वं तथाप्यनुद्दीपितोऽप्यजात एवेति उद्दीपकेऽपि कारण-
त्वोपचारात् तत्रापि विभावव्यवहारः विभावादिसंज्ञा च विभावनादिव्यापारयोगात् तथा चामनाः

का० रूपतयास्थिता न्रत्यादीन् स्थायिनो विभावयंति सास्वादांकुरप्रयोगस्यतां नयंतीते विभावाः अनुभाव
प्र० यंति च तानीत्यनुभावाः पोषकतया विशेषेणाभितः काये स्थितञ्चारयंति विशेषेणाभिमुख्येन चरंती
२० तिवा व्यभिचारिणः व्यक्त इति व्यक्तिश्च वर्णेति पर्यायः साच विशेषणतयाच व्यक्तिविशिष्ट एव स्थायी
20 रसः एवं च रसस्य कार्यत्ववचनं विभावादिभिः काव्योपस्थापितैः स्थायिनो जननात् विभावादिकार्य
तयैव प्रकृतत्वाद्विशिष्टत्वस्य कार्यत्वान्न वह्न्युद्दकत्वाद्वा नीलघटत्ववत् तस्मात्स्थायी न रसः किं तु विभा
वादिमेलकत्वं वैस्त्वं वा अन्यथा न कार्य इत्यादिग्रंथविरोधादिति प्रलपितमात्रमनादेयं सततैरिति यस्य
या निर्करणादीनि सतैस्तज्जातीयैरित्यर्थः स्थायी विरुद्धैरविरुद्धैर्वा भावैरतिरस्कृतप्रवाहो भावः यदुक्तं
विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः आनंदांकुरकंदोसौ भावः स्थायिपदास्पदं न चैवं स्रक्कपोलक-
ल्पना सूत्रकारस्य उक्तं हि भरतेन विभावानुभावव्यभिचारिभावाद्रसनिष्पत्तिरिति एतद्विवृण्वने भट्ट
लोल्लटप्रभृतयः स्थायिनं विभावेनोत्पाद्योत्पादकरूपादनभावेन गम्यगमकभावस्वरूपाद्व्यभिचारि
णा पोष्यपोषकभावरूपात्संयोगात्संबंधाद्रसस्य निष्पत्तिरुत्पत्तिरभिव्यक्तिः इति सूत्रार्थः तथाहि ल
लनादिभिरालम्बनविभावैः स्थायी रत्यादिको जनित उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः अनुभावैः
कटाक्षभुजाक्षेपणादिभिः प्रतीतियोग्यः कृतः व्यभिचारिभिरुत्कण्ठादिभिः परिपोषितो रामादावनु
कार्ये रसः नटेन तत्तद्रूपतानुसंधानवशादारोप्यमाणः सामाजिकानां चमत्कारहेतुरिति तदेतद

पेशलं सामाजिकेश्वतदभावे तत्र चमत्कारविरोधात् न च तज्ज्ञानमेव चमत्कारहेतुः शाब्दज्ञानेऽपि तदा
पत्तेः लौकिकशृंगारादिदर्शनेनापि चमत्कारप्रसंगात् न चानुभावादिज्ञानबलायातस्त्रोरोपस्थान
नु साक्षात्कारमात्रमिति वाच्यं चंदनस्पर्शादौ वैपरीत्यदर्शनात् अन्यथैवोपपद्यमानाद्दशकल्पनाभावा
दिभिरनुदेयानुमापकभावरूपसंबंधाद्रसस्य निष्पत्तिरित्यर्थः तथाहि विषयनियमविषयानोः स^
म्यग्बुद्धिः यथा राम एवायमयमेव राम इत्ययोगान्ययोगव्यवच्छेदविषयी ग्रनरावगीणि वाथानु मिथ्या
धीः यथोत्तरकालिके न रामोऽयमिति बाधे रामोऽयमिति विरुद्धोभयकोटिकान्न संशयः सादृश्यधीः य
था राममसदृशोऽयमिति नाप्यः किं त्वसिद्धाभो विलक्षणानया चित्रतुरगोऽयमितिवद्रामोऽयमुव्याप्रथम
पदभूतो नटो विषयी क्रियते ननु लङ्घाविद्यमानमपि विभावादित्रयं लिंगमवगम्यते ऊनपूर्वमेव रोमांचा
द्याविर्भावे गुरुशिक्षाभ्यासाद्यहृतातिशयाभ्यासेन नटेन सेयं समागेभुरुपावसक्ष्टरासंमूढकर्णरशी
लाकिकीदृशोः मनोरथः श्रीमन्नसः शरीरिणीप्राणेश्वरीलोचनगोचरं गतेति देवादहमद्य नयावप
लायितनेत्रयाविप्रलब्धः अविरलविलोलजलदः कालः समुपागतश्चायं इत्यादौ काव्यानुसंधानबला
दालंबनोद्दीपनव्यञ्जनैर्दत्तगुणस्य रोमांचादेर्दर्शनीयस्यानुभावेन व्यञ्जनीयस्योत्कण्ठादेः सत्कार्यप्रक
टेन चमत्काराधानात् अथ नैः कृत्रिमत्वेनाज्ञानाल्लिंगैरपि कृत्रिमत्वेनाज्ञानात्तस्यार्थी रत्यादिरनुमीयते सैवा
नुमितिः स च चमत्काररूपा चर्वणा जनस्तया विषयीक्रियमाणस्थायी रस उच्यते च वर्णा च सामाजिका

का॰ प्र॰ २१ नामितिनैष्वेवरसइतिव्यवहारः ननुसाक्षात्कारएवचमत्कारोनतानुमित्यादिरपि अन्यथासत्वोद्रेकादा

नुनीयमानेपि रसस्यात् वस्तुसौंदर्यबलाद्रसनीयत्वेनस्थायिनोमन्याऽनुमेयवैलक्षण्यात् स्थायि

नोनष्टेसत्वाद्वाधावतारेणुनमितिरेकत्वंस्यात् इतिचेन्नअभावनिश्चयाभावावगाहितयासंभाव्यमानता

21 त् एतन्नटप्पदहृदयग्राहियतः प्रत्यक्षमेवज्ञानंसचमत्कारंप्रमाणानामनुमित्यादिरपिलोकप्रसिद्धिमवधू

यान्यथाकल्पनेप्रमाणाभावः सूत्रस्यान्यथैवयोजनसंभवात् भट्टनायकस्तु ननतावन्नटगतत्वेननवा

रामगतत्वेनानुमीयतेनचैवंधतेन सामाजिकगतत्वेनव्यज्यते आयपक्षयोरुक्तदोषात् अन्त्यगतेना

न्येषांचमत्काराभावाच्चमूलेसिद्धस्यैवव्यक्तत्वाच्चरसस्यासिद्धत्वात् सर्वेषामेवाभिव्यक्तिप्रसंगाच्च तस्मा

द्विभावादिभिःसंयोगात् भोज्यभोजकभावसंबंधाद्रसस्यनिष्पत्तिः उक्तिरितिसूत्रार्थः नचभोगपक्षेपिदो

षावकाशः भोगस्यालौकिकत्वात् तथाप्यन्यनिष्ठः स्थायी अन्यनिष्ठेरपिविभावादिभिः कथमन्येनभो

क्तव्योतिप्रसंगादितिचेदुच्यते शब्दात्मनःकाव्यस्यत्रयोव्यापाराअभिधाभावकत्वंभोजकत्वंचाभिधा

त्वंनरसानताश्रितस्थितेनहिधाभावकत्वसाधारणीकरणं तेनहिव्यापारेणाभिधादयः स्थायीसाधार

णीक्रियंते साधारणीकरणंचनदेयमीतादिविशेषाणांकामिनीत्वादिसामान्येनोपस्थितिः स्थाय्यनु

भवादीनांचसंबंधिविशेषानवच्छिन्नत्वमेवद्वितीयंव्यापारहृदयंनाट्येपिएवंकाव्येनासेचहितीयव्यापारे

णसाधारणीकृतविभावादिभिस्तृतीयव्यापारसाहित्येनतथाकृतएवस्थायीभुज्यतेभोगश्चरसमनु

णोद्रेकात्प्रकाशानंदमयस्वरूपे लौकिकेस्वस्वानुभवविलक्षणः सत्त्वरजस्तमसां उद्रेकक्रमात्स्वरू
डः स्वमोहाप्रकाशरूपेणोद्रेकस्तु गुणानभिभूयावस्थानमिति सांख्यसिद्धांतानुसारेण विरुद्ध एवेति तदपि न
सम्यक् एतादृशव्यापारद्वयकल्पने प्रमाणाभावात् भुक्तेर्ज्ञानातिरेकस्यानुभवबाधितत्वेन निष्पत्त्यप्रमा
नस्य चाभिधाव्यक्तिपक्ष एव पर्यवसानात् आचार्याभिनवगुप्तपादास्तु स्थायिनो विभावादिभिः सम्यग्
व्यंजकभावरूपात्संबंधाद्धि विभावादीनामेव व्यापारैस्सह संयोगात् मिलनाद्रससम्यग्निष्पत्तिरभिव्यक्तिः तथा
हि लोके प्रमदादिभिः कारणादिभिः स्थायिनो रत्यादेरनुमानेऽभ्यासेन पाटवं झटिति प्रवृत्तिरहृदयानां सामा
जिकानां सहृदयानां स्थायिनो रत्यादिस्थायीकाव्येनासेचनगुणालंकारयोगात् चतुर्विधाभिनयेन च यथोचित
विभावनादिव्यापारवत्त्वाद् अलौकिकविभावादिशब्दव्यपदेश्यप्रयोगपटुःशाविशिष्टैः तैरेव कारणादिभिर्व्यज्य
ते ननु एवं येषां पूर्वं रत्यादिः सोऽत्यन्तं तेषां न वासनाविरहिणां किं रसाभिव्यक्तिः नैतस्यैव कः संदेहः अत एव
शृंगारिकाणामेव शृंगारस्य निर्विलक्षभावानामेव चांतस्याभिव्यक्तिरित्याद्यनुभूयते किं च अपरास्त्वा
त्विकी वासनासहकारिणी या विना शृंगारिणामपि मीमांसकवैयाकरणानां न रसाभिव्यक्तिः तदुक्तं वास
नेन हेतुः स्यात्सत्यात्मीमांसकादिष्विति ननु तथाप्यन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्य स्थायिनो
भिव्यक्तिः तस्यान्ते समं मैवं तेषां शत्रुरेव नटस्य सेव्येन इति संबंधविशेषस्वीकारनियमस्य न ममैवेते न शत्रो
रेवैते न नटस्य सेव्येनेति संबंधविशेषपरिहारनियमस्य चाज्ञानात्तेषां साधारण्येन प्रतीतेः साधारण्ये

नप्रतीतिस्तु न सर्वसंबंधितयाप्रतीतिः किंतु संबंधिविशेषविषयत्वेनाप्रतीतेऽप्रतीतिः यद्वामुकस्यैवेत्यव
का॰ धारणं विनामुकस्यैवेत्येवं प्रतीतेः शृंगारवोक्तं ममैवैताइति नियमानध्यवसायादितिन याचस्वीय यद्वा॰
प्र॰ संसर्गास्यग्रहात् स्वीयत्वसंसर्गाग्रहप्रयोजनं संपद्यते एवं च वाक्यार्थबोधे संबंधिविषयत्वानुभावो पि॰
२२ न विरुध्यते संसर्गबोधे संबंधी न विषयः किंतु पदार्थस्मरणमेवेत्यनुभवविरोधाद्विचारासहत्वाच्चानु॰
पादेयं नन्वेवं विभावादीनां साधारण्यं विना तत्त्वाभावानाद्रसत्साधारण्येन स्थायिनोऽस्तु तत्कथं स्यात्तस्या॰
तत्तदात्मनिष्ठत्वात् यद्यप्यसाधारण्येऽपि तस्य नरस्य प्रतीतिविरोधस्तथापि तदंशे सहृदयसंवादनोत्स्या॰
त् स एव लौकिकतादृशस्वीकारकारणमिति उच्यते उपायानां विभावादीनां स्वरूपसाधारण्यबलाद्र
सानुभवकाले स्थायिनां प्रमाणविशेषनिष्ठत्वलक्षणधाः परिमितप्रमातृतायापहिगलनज्ञानं नद्ध॰
वेनान्निषिनो वेद्यांतरसम्पर्कशून्योपरिमितो भावो यस्य तेन प्रमात्रा सकलसहृदयसंवादकारिणा प्रमा
तृविशेषसंबंधाग्रहरूपेण साधारण्येन स्थायी चर्व्यते ननु विशिष्टाचर्वणाविशिष्टस्थायी रसस्तन्मद्यते च
र्वणायाश्च स्थायी विषयीक्रियतां नाम न सत्त्वात्मकश्चात्मेति न रसस्य व्यक्तिरिति चेन्न स्वप्रकाशानन्दे स्वाकार
वदभिन्नस्यात्मनो विषयीकरणात् अभिव्यंति विशिष्टरत्यादिस्थायी चर्व्यमाणोऽनेकक्षणं तथा च चर्वणानाशे
विनष्टो रस इति प्रतीतिविषयो विभावादिजीवितावधित्वेनानित्यचर्वणः पुर इव परिस्फुरन् हृदयमिव प्र
विशन् सर्वांगीणमिवालिंगन् अन्यत्सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन्नत एवालौकिकच राम॰ २२

मत्कारकरशृंगारादिको रस इत्युच्यते नन्वेवं स्थायिविभावादिसमूहालम्बनात्मिका रसस्य प्रतीतिरि-
ति पर्यवसन्नं न स्वतन्त्रं विभावादीनां पार्थक्येन प्रतीतिप्रसंगात् घटपटाविति समूहालम्बनवदिति-
चेन्न पानकरसन्यायेन चर्वणात् यथा पानके कर्पूरादीनां पार्थक्येन नानुभूयते तथात्रापि विभावाद-
यः नतु विभावादीनां परामर्शान्वयव्यतिरेकान्तत्कार्य एव रसः किं नोच्यत इति चेन्न विभावादिपरा-
मर्शस्य कारणत्वं यदि स्यात्तदा निमित्तकारणमेव न च तन्नाशस्य कार्यनाशकता दृष्टा दण्डादीनां तथात्वा-
नभ्युपगमात् चर्वणादिस्पर्शजन्यसुखादिमायो भविष्यतीति चेन्न नहि तत्र स्पर्शाभावेन सुखं विना-
श्यते किं तु नष्टभावे कारणाभावात्कार्यं नोत्पद्यते उत्पन्नस्य सुखस्य तर्हि कथं विनाश इति चेत् विरोधिगु-
णान्तरात् अत्रापि तथास्त्विति चेन्न रसस्य वेद्यान्तरसंपर्कशून्यतया ज्ञानान्तरादेस्तत्कालेऽभावात् नन्वेषदो-
षो व्यक्तावपि समान इति चेन्न समानव्यक्तेर्लोकोत्तरतया दोषासंस्पर्शात् किं च चर्वणाविशिष्टः स्थायी रसः
न च कार्याद्युपस्थाप्यो विभावादिविशिष्टहेतुः तर्हि स्वज्ञाप्य इति चेन्न विभावादिपरामर्शं विना नास्तीहेरभा-
वात् न चैकैव सामग्री निष्पादिका ज्ञापिका च संभवति किं च स्वाभिन्नतज्जन्यज्ञानविषयो हि ज्ञाप्य उच्यते
अत एव स्वप्रकाशनयेऽपि वा घटादिज्ञानं न चक्षुरादिज्ञाप्यं व्यवह्रियते न चात्र तथा स्वाभिन्नतज्जन्यज्ञानवि-
षय तथैव न तज्ज्ञाप्यत्वं न निषेधः किं तु विभावादिभिर्व्यञ्जितः चर्वणीयकारकज्ञापकाभ्यामन्यो हेतुर्लौ-
केन प्रसिद्ध इति चेत् अलौकिकसिद्धेर्भूषणमेतन्न तु दूषणं कथं नहि विभावादिभिरुत्पन्नो रसो ज्ञेयो र-

सहृत्यादिव्यवहारस्वरसेन प्रायस्तावच्च वर्णोत्पत्त्यानन्तरोत्पत्त्युपचाराद्धि नीयोपि गुणालंकाराद्यसंभिन्नर
का॰ मादिविषयायां लौकिकी प्रमितिः यथा परिपक्वयोगिनां युंजानपदवाच्यानां जगद्भेदविषयकतत्वशालि
प्र॰ विज्ञानं यथा परिपक्वयोगिनां युक्तपदवाच्यानां बाह्यार्थसंस्पर्शरहितं स्वात्ममात्रविषयं संवेदनं तेभ्यो गु॰
२२ णालंकारयुक्तरसादिमात्रविषयतया विलक्षणं यत्संवेदनं तद्गोचरं न येति मन्तव्यं नकेवलमसत्वादज्ञा
23 नोरसः किंविनोपि यत्र लोकाहृदयं नतिविकल्पकं विभावादिपरामर्शनिर्विकल्पजननायोग्यत्वात् नापि
स्वाभिन्नसविकल्पकं वक्ष्यमाणस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनमात्रसिद्धत्वात् यद्वेणादृशायां
ज्ञानान्तराभावात् स्वाभिन्नसविकल्पकविषयत्वेन ज्ञाप्यत्वमिष्टमेव नतु निर्विकल्पकत्वाभिन्नसविक
ल्पकयोरन्यतरविषयत्वाभावे परविषयत्वपर्यवसन्नः तथा चैकविषयत्वाभावेप्यपरविषयत्वपर्य
वसन्नः तथा चैकविषयत्वाभावे अपरविषयत्वप्रसक्तिरित्युभयविषयत्वाभावेनोभयविषयत्वं प्रसज्ये
नेति चेत्तन्न एवं ह्युभयरूपत्वमापद्यमानं स्वाभिन्नसविकल्पकविषयत्वरूपत्वं तीयकोटिशालित्वया॰
लौकोत्तरचमत्काररसेवगमयति न पुनर्विरोधमिति अथ विभावादयो मिलिताः किमिति व्यंजकत्वेनि
र्दिष्टाः एकैकस्य व्यंजकत्वे व्यभिचारात् अथैकस्तावदन्यद्वयाक्षेपात् तत्राप्यस्येव रसव्यक्तिरित्यव्यभि
चार इति चेन्न व्याघ्रादयो हि विभावाः भयानकस्येव वीररौद्राद्भुतवीराणां अश्रुपातादयोऽनुभावाः शृंगारस्येव
करुणभयानकयोः चिन्तादयो व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानामित्यसहृदयाक्षेपानि

यमात् नन्वेवं मिलितस्यैव व्यंजकत्वे एकैकोपस्थितौ रसव्यक्तिर्न स्यात् इष्टापत्तेश्चासौ यथा विगलितम
लिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैः दिशां श्रीः धरणिरभिनवांकुरांकटंकाप्रणतिपरे दयिते
प्रसीद मुग्धे इत्यादौ कामिनीगतनायकरतेरालम्बनोद्दीपनविभावमात्रस्योपस्थितौ एवं परिमृदितम्
मृणालीम्लानमंगं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु कलयति च हिमांशोर्निष्कलंकस्य
लक्ष्मीमभिनवकरिदन्तच्छेदपाण्डुः कपोलः इत्यादावंगमालिन्याद्यनुभावमात्रस्य दूरादुत्सुकम्
आगते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किंचाञ्चितभ्रूलतं मानिन्याश्चर
णानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं चक्षुर्जातमहो प्रपंचचतुरं जातागसि प्रेयसि इत्याद्यौत्सुक्यकादिवि
शेषणव्यंग्यानामौत्सुक्यलज्जाहर्षकोपासूयाप्रमादानां व्यभिचारिभावानां यत्तु यत्र प्रेयसीत्यालम्बनः
विभावोप्युल्लिखितः परत्वानुकूल्यधर्मवत्तया निर्देशादनल्पकल्प एवेति चेदेवं एषां विभावादीनामसा
धारण्येनान्यरसायोग्यत्वे नात्रापि मिलितानामेव व्यंजकत्वात् नन्वेषां चेदसाधारण्यं किमन्यरसायो
ग्यत्वेन एकैकव्यभिचारेण हि त्रयोपादानं स्यात् साधारण्यमेव कथं तर्हि स्थायी विशेषयोग्यविभावा
यपेक्षकत्वमिति चेदुच्यते एकैकव्यभिचारान्मिलितानां व्यंजकत्वे स्थितेः साधारण्येनाधीनरसहृदयाः
साहित्यतत्त्वे किंच रसस्य विभावादिसमूहावलम्बनरूपत्वात् एकैकस्मादसाधारणादपि व्यक्त्यभावान्मिलि
ताभामेव व्यंजकत्वे मतोऽसाधारणेनाधीनरसहृदयमात्त्रिप्यते तत्रो मिलितेष्वादि व्यक्तिरिति केचिदाहुरेक

का॰
प्र॰
२५
२५

एवं शृंगारो रसमेकेविस्सुह्रादयोन्यादिना निरासाय रसभेदानाह शृंगारहास्यकरुणवीररौद्रभयाना-
काः बीभत्साद्भुत संज्ञौ चेत्यष्टौ नाट्येरसाः स्मृताः शांतस्यशो मां चादि विरहेणनभिनयत्वात्काव्य-
मात्रगोचरत्वमित्यभिधानात् अशौविस्तृतं यद्यानाश्रेनावदष्टौ रसाः अतः काव्येपितावंतएव
एवः ननुरसः सुखात्मक इतिप्रतिपादितं तत्कथं दुःखमयः करुणादिरिति चेन्न लोकेतथात्वे
पि काव्यादौ पार्यन्ति कालौकिकसुखोदयात् अन्यथाप्रेक्षावतां सप्रवृत्त्यापत्तेः शृंगारादीनां लक्षण
चरत्वादिप्रकृतिकत्वं तत्र मनोनुकूलेषु र्थेषु सुखसंवेदनं रतिः तत्प्रकृतिको रसः शृंगारः सचद्वे
धा संभोगो विप्रलंभश्च तत्रानुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ दर्शनस्पर्शनादीनि ससं
भोगो मुदान्वितः सच परस्परालोकनालिंगनादिभेदादपरिगणनीय एकएव गण्यते भावो यदा र
तिर्नाम प्रकर्षमधिगच्छति नाधिगच्छति चाभीष्टं विप्रलंभस्तदोच्यते सचसंगमश्चैव तदन्यस्तत्र ज्ञान्यो
भिलाषहेतुक उच्यते अभिलाषपदेन तदेतेराणादिसंगमाभावस्य लक्षणात् आद्यस्तु कश्चिदीर्ष्यया
प्रणयेन वा मानरूपः स ईर्ष्याहेतुक उच्यते ईर्ष्यापदेन मानहेतोरुपलक्षणात् क्वचित्तु कार्यवशा-
द्देशांतरः स्थिते सप्रवासहेतुकोभिधीयते उत्पद्यमानोपत्स्यमानावपि प्रवासोत्स्वज्ञानद्वाराvि
प्रलंभप्रयोजकाविति नाव्याप्तिः प्रवासज्ञानशब्देन ज्ञानलक्षणद्वारा काचिच्छापात् सच शापहेतुक इ
ति व्यवह्रियते कश्चिदकृत्रिमयातिरिक्तानुकूलज्ञादितः कारणात् स एव विरहहेतुक उच्यते करुण

शृंगारस्याद्वैवांतर्भावः न च संभोगो नायिकारब्धो नायकारब्धश्चेति क्रमेणोदाहरणं निःशून्यं वासगृहं वि-
लोक्य शयनादुत्थाय किंचिच्छनैः निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं विस्रब्धं परिचुम्ब्य जा-
तपुलकामालोक्य गण्डस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बितादिलोकेति लज्जा समान-
कर्तृकत्वमुग्धादिविनैव कंचुलिकया धत्ते मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासं-
स्पृशि शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः
वीटिकावसनग्रंथिविश्लेषाभिलाषो हेतुर्यथा प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि यास्वंतःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः प्रेमा स्नेहः सएव प्रकृष्टः प्रणयः सएव परिचयाति-
शयेन रंजनक्षमो रागः ईर्ष्याहेतुको यथा सापत्युः प्रथमेपराधसमये सख्योपदेशं विना नो जानाति
सविभ्रमांगवलनावक्रोक्तिसंसूचनं स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमे-
व रोदिति लुठल्लोलालकैरश्रुभिः सखीनोपदेशः सख्योपदेशः भविष्यत्प्रवासहेतुको यथा प्रस्था-
नं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुनः यातुं निश्चल-
चेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते भूतप्रवासहे-
तुर्यथा कियदम्बु भवेद्रसं दशायां कति वा पल्लवसंचया भवेयुः कियती च समृद्धिरम्बुजानां परितो

का० पोपहृियेतयैवयांथाः सत्वाप्रवासिनं नायकं प्रतीयमुक्तिः भवन्तहेतुको यथा ममैतुकिं मृद्धे परि
प्र० त्विद्येमकतिपयैरेवप्रियेवासरैरायामोवयमेहृियेहृपरिनः शास्यानिकंमंगलं एवं वाष्टिनिवहृ
२५ मेदयितयानिः ष्वस्यपाणिहृतो मांगल्यकलशोविलोचनयपयोधाराभिराप्लरितः शापहेतुको
25 यथा त्वामालिख्यप्रणयकुपितांधातुरागैः शिलायामात्मानंनेवरणपतितंयावदिच्छामिकर्तुं प्रस्ते
स्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेक्रूरस्तस्मिन्नपि न सहते संगमं नो कृतांतः आलिख्येत्सपीछावि
षयएव विरहहेतुकोयथा अन्यत्रव्रजतीतिकात्वलुकथानाप्यस्यताद्दक्सुहृद्योमांनेच्छतिनाग
तस्वहहहाकोयंविधेःप्रक्रमः इत्यल्पेतरकल्पनाकवलितस्वांतानिशांतांतरे बालावृत्तविवर्तन
व्यतिकरानाप्नोतिनिद्रांनिशि एषाविरहोत्कण्ठितेत्यभिलाषहेतुकोदेर्भिद्यते वागंपेशादिभिर्वि
तोविकासोहासउच्यते अंगप्रवैकृतंतेनहासप्रकृतिकोहास्यः यथा आकुंच्य पाणिमशुचिं मम मूर्द्धि
वेश्यामंत्राभसाप्रतिपदं पृषतैः पवित्रे तारस्वरंप्रहितथूत्कमदात्प्रहारं हा हा हतोहमितिरोदिति
विष्णुशर्मा अद्यतात्यमानोविस्तृशमीनतस्कंदेनचविभावोरसाश्रयस्य पुनर्हासकमनुभावः चापलादि
र्व्यभिचारीति इष्टनाशादिभिश्चेतोवैक्लव्यंशोकशब्दभाक् आदिग्रहणाद्दनिष्टाप्तेः शोकप्रकृतिकः क
रुणोयथा हास्यंतस्त्वरितनाशितमेतत्किमिदं हा देवताः क्वासि धिक्प्रमाणमप्रतिनो शनिर्हतवह्नलें गे
भुदग्धेहरशो इत्थं वरवर्णमथ्यरुद्दकरुणं पौरांगनानांगिरश्चित्रस्थानपिरोदयंतिशनथाकुर्वंतिभित्ती

रपि अत्र विपन्नाकाचिदीश्वरी संबोध्यानदृङ्गदाह स्म विभावो प्रतिकूले भूते द्वणस्य प्रबोधः कोप उच्यते
तत्प्रकृतिको रौद्रः यथा हन्तानमनुमननं दृष्ट्वा येरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदा
युधैः नरकरिपुगणसार्वं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं का-
मीरं भेत्रु संरंभः श्रेयानुत्साह उच्यते तत्प्रकृतिको वीरः स च त्रिधा युद्धवीरो दानवीरो दयावीरश्च त-
त्राद्यो यथा तुष्टा सेना समन्ते विजहन्तह रयोमित्र चक्रे भंक्त्वा भाग्य महे हे कुलश्रीद पतिपरममीसाय का-
निष्यन्ततः सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गलीलानियमितजलधिं
राममन्वेषयामि अपरावृहनीयो रौद्रशक्त्या तु जनितं चित्तवैक्लव्यं भयं तत्प्रकृतिको भयानकः
यथा ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व-
कायं दर्भैरर्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तो-
कमुर्व्यां प्रयाति जगुप्सा विस्मयार्थानां दोषमाहात्म्यदर्शनात् तत्प्रकृतिको वीभत्सः यथा उत्कृत्यो-
त्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा-
र्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्य-
ग्रमत्ति विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् तत्प्रकृतिकोऽद्भुतः यथा चित्रं महानेष बतावता-
रः क्व कान्तिरेषाभिनवैव भङ्गिः लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः एषां भेदा

का० प्र० २९

वचनमात्रान्न सिध्यतीति एषां विचित्रानुरूपां स्थायिभावानाह रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा
जुगुप्सा विस्मयश्चेमे स्थायिभावाः प्रकीर्तिताः नत्वविरुद्धा अविरुद्धा वा यतिरोधातुमक्षमाः आनंदांकुर
कंदोऽसौ भावः स्थायिपदास्पदं सामान्यलक्षणं अवस्थितिरेषां तु कल्पनमायेन फेनबुद्बुदन्यायेन त्व्यभि
चारिणामित्यनयोर्भेदः विशेषलक्षणान्यनुक्तानि ग्रहीतान्यासेति चेत्स्थायिनो न्यूनाधिक्यशंका निरस्तेतिय
यद्यपि विभावानुभावप्रतिपाद्यव्यंजकत्वपुरस्कारेण व्यभिचारिभेदोपदर्शनेन कश्चिन्न्यायस्तथापि व्यं
ग्यसद्भावविवेचनाय निर्वेदस्य स्थायित्वव्यवस्थापनाय च व्यभिचारिभेदानाह निर्वेदग्लानिशंकाख्यास्तथा
सूयामदश्रमाः आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो विषा
द औत्सुक्यं निद्रापस्मार एव च सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथा म
रणमेव च शमश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः त्रयस्त्रिंशदमी भावाः समाख्याताः स्वनामतः ना
मत एव समाख्यातानां तु लक्षणं न तल्लक्षणनामभिरेव च प्रपंचं दर्शितवान् तद्यथा तत्वज्ञानाप
दीर्ष्यादेर्निर्वेदः स्वावमाननं तत्र चिंताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनता विज्ञस्य खेदोऽतिर्निर्वेदस्तत्र ज्ञा
नोदयादिभिरिति केचित् रत्यायासकलाभ्यासा ग्लानिर्निःप्राणतेव या २ तस्यां वैवर्ण्यकंपानुत्साहका
र्श्यादयो मताः अनर्थप्रतिभाशंका परक्रौर्यात्स्वदुर्नयात् वैवर्ण्यकंपवैस्वर्यपार्श्वालोकास्यशोष
कृत् परोत्कर्षाक्षमासूया गर्वदौर्जन्यमन्युजा दोषोक्तिवभ्रूविभेदावज्ञाकोपेंगितादयः संमोहानंद

संभेदस्खलदंगवचोगतिः मधुपानादिजो ह्रेयो मोदविविधभावकृत् उन्मत्तः प्रहसति गायति
नरस्त्वमध्यमप्रकृतिः परुषवचनाभिधायी चेनेरीटित्यधमसत्वः श्रमः खेदोऽध्वरत्यादेः श्वासनि
द्राभरादिकृत् श्रमस्त्रास्मोविभेदं नु चकैः कारणाकार्यनाश्रमस्यातिशयावस्यामप्यवाप्तानि भूर
चरेवलस्यापचयो ग्लानिराधिव्याधिप्रकर्षभूरितैके आलस्यश्रमगर्भादेर्जैह्यंजृंभाक्रियादिकृत्
दौर्गत्यादेरनौजस्यं दैन्यं कार्ष्ण्यमृजादिमत् ध्यानं चिंताहितानाप्तेः शून्यताश्वासतापकृत् मयत्नस
विकाल्पेष्यस्मृतिस्त्रिनेति किंचनसोऽहो विवितनाभीतिदुःखरोगानुचिंतनैः चूर्णानाज्ञानपतनभ्र
मणदर्शनादिमत् स्मृतःपाज्ञानचिंताद्यैः संस्काराज्ञाययेस्मृतिः भ्रमतुल्लासकरजवादनादिस्तु
डुद्भवः अभीष्टार्थस्य संप्राप्तेस्पृहापर्याप्तताधृतिः सौहित्यवदनोल्लाससहासप्रतिभादिकृत् उ
राचारादिभिर्व्रीडाधार्ष्ट्याभावो विधीयते वस्त्रांगुलीयकस्पर्शभूरेखाधोमुखत्वकृत् चेतोनिमील
ने व्रीडात्यंगरागयवादिभिरितिकेचित् मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः श्रान्तप्रकाशानु
करावेशावपलनोच्यत इति केचित् तत्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः मनःप्रसादो लाभादे
र्हर्षास्त्रस्वेदगद्गदाः आवेगो राजविद्रावरस्यादेः संभ्रमो मतः तत्र विस्मरणस्तंभः स्वेदकंपः स्खल
त्कृतिः प्रतिपत्तिर्जडतास्यादिष्टानिष्टदर्शनश्रुतिभिः अनिमिषनयननिरीक्षणतूष्णींभावादयः
तत्र क्रियास्वपाटवं जाड्यं चिंतोत्कण्ठाभयादिभिरित्येके गर्वोऽभिजनलावण्यधनैश्वर्यादिभि

का॰ प्र॰ २०

मेदः सविलासांगचेष्टाविनयावज्ञादिकृन्मदः आवश्यकार्यासिद्ध्यादेर्विषादः सत्वसंक्षयः निःश्वा
सोच्छ्वासंतापसहायान्वेषणादयः कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः तत्रोच्छ्वासत्वराश्वास-
हृत्तापस्वेदविभ्रमाः निद्राव्यापारवैमुख्यमिंद्रियाणां श्रमादिभिः तत्रजृंभांगसदीक्षिमीलनोच्छ्वास-
नादयः आदिग्धात्यंतदुःखादेरपस्मारस्तथाविधः मनःक्षेपःस्त्वपस्मारोग्रहाद्यावेशसंभवः विरो
धिभावात्पूर्वस्यापस्मृतिर्भवेत् ध्यानजाड्यप्रमोहादिपरितापादिकृन्मतः स्वप्नो निद्रामुपेतस्य विष
यानुभवस्तु यः कोपावेगभयग्लानिसुखदुःखादिकारकः निद्रापगमहेतुभ्यः प्रबोधश्चेतनागा
मः जृंभांगभंगनयनमीलनांगावलोककृत् अधिक्षेपापमानादेरमर्षोभिनिविष्टता तत्रस्वेदशि
रःकम्पनेत्रारागांगविक्रियाः लज्जाद्यैर्विक्रियापोहोवहित्थात्मन्यविक्रियाव्यापारांतरसंगित्ववदनान
मनादयः द्विष्टेपराधदौर्मुख्यचौर्याद्यैश्चंडत्वमुग्रता तत्रस्वेदशिरकंपताडनातर्जनादयः भ्रांतिच्छे
दोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः स्मेरतास्मृतिसंतोषौ बहुमानस्तथात्मनि व्याधयः संनिपा-
ताद्यास्तेषामन्यत्र विस्तरः प्रस्वेदकंपनतापादयस्तु भावनयोदिता उत्कंठाहर्षशोकादेरुन्माद
श्चित्तविभ्रमः तस्मिन्नस्थानरुदितगीतहासस्मितादयः जीवस्योत्क्रमनारंभो मरणं परिकीर्तितं सं
मोहेंद्रियविश्रांतिगात्रविक्षेपणादिकृत् अत्र च मरणस्थाने केचित्करुणं पठंति सा च परदुःखप्र
हाणेच्छारूपत्वाच्चित्तवैक्लव्यमयाच्छोकादतिरिच्यते इति तद्गुणेन मयानुचितमिस्येके अन्ये नुदया

२०

वीरस्थायित्वं न स्यादन्यत्र नङ्गणानामौचित्यमित्युक्तः नचान्यत्र संचारित्वाद्गुणानां फलवदिति वाच्यं स्था
यिनरसासाधारणत्वान्नैपि क्वचन संचारिणः तदुक्तं शृंगारवीर्ययोर्हासो वीरे क्रोधस्तथा मतः शांते जु
गुप्सा कार्यिनाव्यभिचारि नयायुतः इत्याद्यन्यत्र मुनेर्यं स्वयं भावितबुद्धिभिरिति गर्जितादेर्मनः क्षोभ
त्रासोत्रोत्कंपितादयः ऊहो वितर्कसंदेहाद्भूशिरोंगुलिनर्तकः निर्वेदस्यामंगलप्रायप्रथमनिर्देशप्र
तेपि प्रांनिर्देशो मुख्यत्वप्रकाशनेन स्थायित्वप्रतिपादनाय निर्वेदस्थायिभावाख्यः शांतोपि नवमो रसः
तत्त्वहृति कल्पत्वाद्यथा अहो वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि
वा तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः स्त्रैणः स्त्री
णां समूहः रागद्वेषाभ्यां द्वयोर्हेययोस्तुल्यरूपता द्योत्यते अत्र वदंति शांतो नाम रसस्तावदनुभवसिद्धत्वा
दुरपह्नवः न चैतस्य स्थायी निर्वेदो युज्यते तस्य विषयेष्वलंप्रत्ययरूपत्वात् आत्मावमानरूपत्वाद्वा
शांतेस्तु निखिलविषयपरिहारजनितात्ममात्रप्रादुर्भावमयत्वानुभवात् तदुक्तं यच्च कामसुखं लोके य
च्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति अत एव सर्वचित्तवृत्तिविरामोस्य स्थायी
ति निरस्तं अभावस्य स्थायित्वायोगात् तस्माच्छमोस्य स्थायी निर्वेदादयस्तु व्यभिचारिणः सच शमो निरी
हावस्थायामानंदः स्वात्मविश्रमादिति रसवज्ञावोप्यलक्ष्यक्रमेषु पठितः स किंरूपः रसादीनां रसरूप
त्वात् व्यभिचारिणां रसांगतानियमेन प्राधान्याभावात् सात्त्विकानामव्यंग्यत्वादिति मनस्याह रतिर्देयादिवि

का॰ प्र॰ २८ षयाव्यभिचारी तथांजितः भावः प्रोक्तः रतिरिति स्थायिभावोपलक्षणं देवादिविषयत्वमपि अप्राप्तरसाव
स्थत्वोपलक्षणं तेन देवादिविषया रतिः सर्वकान्तादिविषयाप्यपुष्टा रतिहासादयश्चाप्राप्तरसावस्थाः
48 प्राधान्येन व्यंजितो व्यभिचारी च भाव इति निर्णयं यदुक्तं रत्यादिश्चेन्निरंगः स्याद्देवादिविषयो यथा अ
त्यागभोगवभागवास्यात्र नतदास्यापि शहूभागिति नटेन तदाहृहृन्निकारः कान्तादिविषया तु व्यक्ता शृंगारः
तत्र देवविषया रतिर्यथा कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतं अप्युपात्तममृतं भवद्व
पुर्भेदवृत्ति यदि रोचते न मे मुनिविषया रतिर्यथा हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां एवमन्यान्यपि पुत्रादिविषया रतिः स्था
य्यव्यंवा पुष्टमुदाहार्यम् व्यभिचारी प्राधान्येन व्यञ्जितो यथा जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः नो यावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियां भ्रातस्ता
वदहं शठेन विधिना निद्रादरिद्रीकृतः अत्र विधिं प्रत्यसूया प्राधान्येन प्रतीयते तदाभासा अनौचित्यप्रव
र्तिताः तदाभासा रसाभासा भावाभासाश्चेत्यर्थः अनौचित्येन प्रकर्षविरोधिना रूपेणेत्यर्थः तत्रैकाश्रय
त्वे तिर्यगादिविषयत्वे बहुविषयत्वे व्यभिचारिणामाभासा गतानायां वाद्रष्टव्यं एकविषया रतिरेव तु नेति न
प्रलापः वंदीकृतनृपाहिंसाभित्यादौ उदाहरिष्यमाणत्वात् रसाभासो यथा स्तुमः कं वामाक्षि क्षणमपि
विनायं न रमसे विलोभ्यैकः प्राणानृणमुपवः सुखेयं मे गायसे स्थलग्नेकोजातः शशीमुग्धे यमालिंगत्विव
२८

लात्तपः स्त्रीः कुत्सैषा मदननगरिष्यायसि तु यं अत्र बहुषु व्यापारोपपादने बहुविषया रतिर्व्यज्यते नन्वत्रा-
व्यापारस्य बहुविषयत्वमस्तित्वं एकत्रापि नाहृशव्यापारसंभवात् यत्र अनेककर्मोपादनमनेकविषयत्वं कि-
याणां प्रकटयति एकविषयत्वाभिप्रायेत्वेकमेव कर्मपदमुपाददीतेति ननु हृ लुभाविलेभे इत्यादौ-
नाभिन्नवाक्यस्थानामेकविभक्तानां पदोपस्थापिनान्वयेन तदन्वयिनोभिन्नस्यापि किं कइत्यादिपदैरुपस्थाप-
नेभिन्नकर्मपदैरेवोपस्थापनार्हणात् अत्र ब्रूमः त्वशब्देन बहुद्युपार्थेन व्यापारस्यानेकविषयत्वं लभ्यते
एवमेकत्वभेदाभिप्रायेव गतेन्यत्रापि तथैवावगम्यते बहुपदमनेकपरं वा भावाभासो यथा कान्त्वथाकर-
गुरवीनवलायनादीमास्मेरयौवनतरंगितविभ्रमांगी नाकिंकरोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यति-
करेकइवाभ्युपायः अत्र रतेर्व्यभिचारिभूता चिंताप्रनौचित्यप्रवर्तिता नायिकायाश्चननुरक्तया रतेरनुरक्तेष्ठ-
त्वेन तद्व्यभिचारिणोपि तथात्वात् एवमन्येप्युदाहार्याः भावशान्त्यादिरक्रमरसत्वात्र भावशान्त्यादिपदं प्रति-
पाद्यमाह भावस्य शान्तिरुदयः संधिः शबलता नानतथा संधिरेककालमेव तुल्यकक्षयोरास्वादः शबला-
तानुकालभेदेन निरंतरतया पूर्वपूर्वोपमर्दनानं च भावशबलतायाः शान्त्युदयाभासः विशेषणानेनरुदय-
स्यवाप्येकैकस्यास्वादेतद्वेदहृयोपगमात् तत्र भावशान्तिर्यथा तस्यास्सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्रा-
कितं किंवत्तस्वरणनित्यातिकरव्याजेन गोपाय्यते इत्युक्तेऽनदिस्तदीर्थ सहसा ततंस प्रमाष्टुं मयासा-
श्लिष्टारभसनेन तत्सुखवशात्तस्याश्च तन्निह्रिस्त्नं अत्र कोपसंशान्तावेव चमत्कारविश्रामः उदयो यथा एक

का॰ प्र॰ २९ ५९ स्मिं श्रयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपरांमुखं ग्लपितया चाटूनि कुर्वन्नपि आवेगादवधी
रितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्मा भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः अत्रौत्सुक्यस्योदयः
संधिर्यथा उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फालश्च मां
कर्षतः वैदेहीपरिरंभ एव च मुहुश्चैतन्यमामीलयन्नानंदी हरिचंदनेंदुशिशिरः स्निग्धो रुणद्ध्यन्यतः
अत्र पूर्वार्धे संभ्रमात्मक आवेक उत्तरार्धे हर्षः अनयोस्तुल्यकालमेवास्वादः शबलता यथा क्वाकार्यं
शशिलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेपि कांतं मुखं किं वक्ष्य
न्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं पास्यति अत्र
क्वाकार्यमित्यावितर्कः भूयोपीत्यौत्सुक्यं दोषाणामिति मतिः कोपेपीति स्मृतिः किं वक्ष्यन्तीति शंका स्वप्ने
पीति दैन्यं चेतः स्वास्थ्यमिति धृतिः कः खल्वीति चिंता स्फुटं सर्वपूर्वोपमर्देन प्रीयमाना शबलता चम
त्कारः भूमिः ननु शांत्यादिवत्स्थितिरपि प्रकारः सत्त्वस्यैव तत्कथं नोक्त इति चेन्न भावोक्त्यैव तदुक्तेः
भावस्थितेर्भावाभिन्नत्वात् ननु व्यभिचारिस्थले नियमतोस्त्येव रसस्यावस्थाने तत्कथं भावोदाहरणमे
तत्कथं वा भावध्वनित्वं रसांगत्वेन तेषां गुणीभावादिति चेन्न आह मुख्ये रसेपि तेंगित्वं प्राप्नुवंति कदाचन ते भाव
शांत्यादयः कदाचन यदा त एवांगित्वेन विवक्ष्यंते विवाहप्रवृत्तराजानुगम्यमानभृत्यवत् एवमसंलक्ष्य
क्रमव्यंग्यभेदं विचार्य संलक्ष्यक्रमव्यंग्यस्य भेदानाह अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तु यः शब्दार्थो

२५

भयथाक्रस्याह्यभिधा सकृद्यतितोऽध्वनिः घंटायां हन्यमानायां मुख्यशब्दानंतरं यथा ह्रादो दीयान परोनुरणनरूपः
शब्दः प्रतीयते न तु हस्तस्मा लक्ष्यक्रमाव्यंग्यस्थितिस्तत्र सः शब्दार्थस्य उभयं चेति द्वंद्वः तेन शब्दशक्तिमूलव्यंग्यः
अर्थशक्तिमूलव्यंग्यः उभयशक्तिमूलव्यंग्यश्चेति त्रिधा व्यंग्यः शब्दशक्तिमूलकं चैनद्देव यत्नेनैव शब्देन
नतर्थप्रतीतिर्नतु पर्यायान्तरेणापि चतद्देपरीत्यं चार्थशक्तिमूलत्वं न त्वभिधयानात्मनोऽतिरिति यतेनाभि
धायायत्र न नियमनं द्वेष भेदोद्रष्टव्यः नन्नियमनेन तु नाभिधामूलत्वं किं तु व्यंजनामूलत्वमेव भद्रात्मनर
तिपावत् भवेदितियत्केन चिड्कैतदनुपादेयं भद्रात्मनरस्मादेरेनड्डूदत्वेनेष्टत्वात् अन्यथानस्यस
वैभेदवहिर्भावापत्तेः किंच प्रथमोदाहरणे प्राकरणिकाप्राकरणिकयोरिति व्याख्यानं न हि तोये भवानि
नित्यनेन प्रकरणस्याभिधानियामकस्य सद्भूत्वात् तेषामुदाहरणं तु विरुद्धेन तस्माद्यथोक्तमेव न्याय्यं ने
शुभमध्ये अलंकारेष्ववस्थैव शब्दार्थद्वावभासते प्रधानत्वेन मन्तव्यः शब्दशक्त्युद्भवो द्विधा शब्दशक्तिमूला
नुरणनरूपव्यंग्यो द्विधा अलंकृतस्यानलंकृतवस्तुमत्रस्यवशात् अन्येन प्रकाशादिसर्गः तत्राद्यो यथा उल्ला
स्यकालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन निर्वापितस्सकल एव रणे रिपूणां धारा
जलैस्त्रिजगति ज्वलितप्रतापः कालो वैरिहृतीयः करवालस एव महद् अम्बुधाराजलं वहतीति महाम्बुवा
हः यद्वा महद्उत्सवः स एवाम्बुतद्वाहः गर्जितं सिंहनादः अत्र करवालमुल्लासेनावन्मात्रे वस्त्वे यद
ताहशाशब्दप्रयोगस्तस्यासंबंधार्थकत्वं मा प्रसज्यतामित्यप्राकरणिके दिं द्रवारिवाहादिभिः प्राकरणि

का॰ कानां राजकरवालादीनामुपमानोपमेयभावे कवेस्तात्पर्यमित्युपलंकारो व्यंग्यः स शब्दशक्तिमूलः पर्या
प्र॰ यांतरेण भूपादिना नटर्थोपस्थितौ न तदप्रतीतः एवमग्रेप्यूह्यम् एवमलंकारांतराण्यपि यथा तिग्मरुचि
टी॰ रप्रतापो विधुरनिशाकृद्विभो मधुरलीलः मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् अत्र ति
30 ग्मरुचिः अप्रतापः एवं क्रमेणैकपदत्वेन द्विपदत्वे विरोधाभासः पदभेदेपि विरोधाभासो यथा अमितः
समितः प्राप्तैरुत्कर्षैर्हर्षदप्रभो अहितः सहितः साधुयशोरसनामसि ननु विशेषस्य सर्वत्र व्यंग्यत्वमे
वेनेत्युच्यते तत्क्रियतीसीमा अपि शब्दादेर्विशेषव्यंजकस्य भावे वाच्यत्वं तदभावे व्यंग्यत्वमिति निरूपादान
संभारमभित्तावेव तन्वते जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने चित्रं नानाकारमालेख्यं कला चंद्र
षोडशभागः कौशलं च अत्रोपादाने भित्ताविति आलेख्याकारिभ्यः कलावद्भ्यः शूलिनो व्यतिरेको व्यंग्यः तस्य
चित्रकलाशब्दयोः परिवृत्त्यसहत्वेन शब्दशक्तिमूलत्वमूदाहृतेषूपमादीनां प्राधान्येन वाक्यार्थेऽन्वयात्तेषा
मलंकारत्वं अप्रधानालंकरणात् द्वितीयेऽत्तोस्य काव्यस्य ध्वनित्वं व्यंग्यस्य प्राधान्यादिति चेन्न पूर्वमयमलं
कार आसीदित्येतावतालंकारव्यपदेशात् यथा ब्राह्मणः पूर्वं बौधः संन्यासी निब्राह्मणत्वव्यपदेशः नन्वेवं
व्यपदेशसमर्थनेप्यलंकारध्वनित्वं न समर्थितमिति चेन्न अलंकारपदेन तद्योग्यतयाविवक्षितत्वात् न चै
वं रसादिध्वनावप्यलंकारध्वनित्वप्रसंगः संलक्ष्यक्रमव्यंग्यस्यैव ताद्रशस्य तथाभिप्रेतत्वात् वस्तुतस्तु
प्राधान्याप्राधान्ये व्यंग्यस्य वाच्यापेक्षयैव न तु रसापेक्षया न तदपेक्षया नस्य गुणीभावात् तथा चोपमादीनां

सांगतयालंकारत्वं वाच्यापेक्षयाप्राधान्यं चेति न दोषः वस्तुमात्रं पथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले
गामे न त्थ सुपओहरं मे इव मसि ता वसत्व अत्र यद्युपभोगक्षमोसि तदास्स्वेति व्यज्यते न ह्यपयोहरेति
शब्दशक्तिमूलमिति तथा शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेंद्र यस्मै त्वं यत्र प्रसीदसि पुनः सभा
त्युदारोनुदारश्च अत्र प्रथमावेशनिरशनिश्चेत्यनेन न विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति वस्तुध्व
न्यते ननु विरोधालंकारः शनिरशनिरिति सामानाधिकरण्याभावात् विरोधस्य च तत्रैवाविश्रान्ते द्वितीया
दितु नोदाहरणं तत्र च शब्दस्यार्थत्वे विरोधस्य वाच्यत्वात्स्फुटयमात्रार्थत्वे तु विरोधस्याव्यापत्वात् अर्थश
क्तिमूलानुरणनरूपव्यंग्यं विभजते अर्थशक्त्युद्भवोप्यर्थो व्यंजकस्संभवी स्वतः प्रौढोक्तिमात्रसिद्धो वा
कवेस्तेनोम्भितस्य वा वस्तु वालंकृतिर्वेति षड्भेदोसौ व्यनक्ति यत् वस्त्वलंकारमथवा तेनायं द्वादशात्मकः॥
स्वतः संभवी न केवलं भणितिनिष्पन्नशरीरः अपितु बहिरप्यौचित्येन संभाव्यमानः प्रौढोक्तिमात्रसिद्ध
स्वतः संभवि वस्तुरूपोर्थो वस्तुव्यंजकः स एवालंकारव्यंजकः स्वतः संभव्यलंकारो वा वस्तुव्यंजकः
एवं स्वतः संभविभेदः एवं कविप्रौढोक्तिसिद्धभेदाः एवं कविनिबद्धप्रौढोक्तिसिद्धभेदाः एवं द्वादशार्थ
शक्तिमूलव्यंग्यस्य भेदाः सिद्धास्तत्रापि वस्तुमात्रमलंकृतिर्येति षड्भेदो व्यंजकः षट्साप्व्यंग्यस्यापि प्र
त्येकं वस्तुवालंकृतिर्वेति द्वादश भेदा भवंतीति तत्र स्वतः संभविन्यर्थे भेदचतुष्टये वस्तुना वस्तुनो व्यक्तिर्यथा
अलससिरोमणि धुत्ताण अग्गिमो पुत्ति धणसमिद्धिमओ इअ भणिएण णअंगी पफुल्ललोअणा जाआ अलसस्वेना

न्यत्रगंतुमिच्छुः पूनत्वेनरतेष्वनाथृतगुणः धनसमृद्धिसन्नवाक्रुपणस्तवौनयतिनिर्दायायत् प्रफुल्लन
यनत्वंवस्तुनेनान्यासासनाकर्षणीयइतिममैवोपभोग्यइतिव्यज्यते वस्तुनालंकारस्ययथा धन्यासियाक
थयसिप्रियसंगमेपिविस्रब्धचाटुकशतानिरतांतरेषु नीवींप्रतिप्रणिहितेतुकरेप्रियेण सख्यःशपामि
यदिकिंचिदपिस्मरामि अत्रवाक्येनवस्तुनात्वमधन्याअहंतुधन्येतिस्वव्यतिरेकालंकारोव्यज्यते न-
नुव्यंजकोधन्यासीतित्वम्पदार्थस्यव्यतिरेकालंकारएवनत्वेवंवस्तुव्यंजकोदाहरणमितिचेन्नसंबोध्य-
व्यतिरेकस्तावन्नवाच्यः आत्मनिरूपणाभावस्याशब्दत्वात् व्यंग्यस्यतुयद्यपिभवत्येवतथापिनभवते
तथापितमनपेक्ष्यैववाक्येनवस्तुमात्रेणयथोक्तव्यतिरेकव्यंजनादिति अलंकारेणवस्तुनोयथा दर्पांध
गंधगजकुंभकपाटकूटसंक्रांतिनिघ्नघनशोणितशोणशोचिः वीरैर्व्यलोकियुधिकोपकषायकांतिःका
लीकटाक्षइवयस्यकरेकृपाणः अत्रकालीकटाक्षइववक्रपणोव्यलोकीत्युपमानेनक्षणन्रुत्योद्वासंभावनावि
रहात् तथाचसकलरिपुक्षयःक्षणात्करिष्यतइतिवस्तुप्रकाश्यते अलंकारेणालंकृतेर्यथा गाढकांतद
शनक्षतव्यथासंकटादरिवधूजनस्ययः ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधिरुषानिजाधरं अत्रनिजा
धरदशनवैरिवधूजनोष्ठदशनव्यथामोचनयोःकारणकार्ययोःपौर्वापर्यभावलक्षणयातिशयोक्त्यलंका
रेणदशनसमकालमेवशत्रवोव्यापादिताइतिसमुच्चयोसौसतन्योयुगपद्यागुणाक्रियेत्युक्तलक्षणः
समुच्चयालंकारोद्योत्यते एवमेवतुल्यकालंयोगपद्येनुक्तान्यासातत्ययोगिनेतिपदेनकेचिद्वचने ममता

त्यप्पमस्य त्यतिर्निवर्तन्यमिति त्रुटेरुत्प्रेक्ष्यत्वात्त्रयं गप एवं व्यंजकोऽर्थः स्वतः संभवी कविप्रौढोक्तिसि
द्धे व्यंजकेऽर्थे भेदचतुष्टयेऽर्थे वस्तुना वस्तुनो व्यक्तिर्यथा कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा
कीर्तिं विबुधरमणीगीयमानां यदीयाम् स्रस्तापांगाः सरसविसिनीकांडसंजातशंकादिंगमातंगाः श्रवणपु
लिने हस्तमावर्तयंति अत्र यद्यपि विसिनीकाण्डसंजातशंका इति भ्रांतिमान्संदेहो वालंकारो व्यंजक इति
वस्तुमात्रं व्यंजकोत्वदाहरणमयुक्तं अत्र कीर्तिश्रवणेन तत्र केभेह स्तावर्तनं हस्तिनो न स्वतः संभवि किं
तु कविसंप्रदायात्कविना वर्णितमिति प्रौढोक्तिसिद्धं एवमग्रेऽपि द्रष्टव्यं अर्थेनैव वस्तुनालंकारस्य यथा
कमेहवलासोभिन्नगनलासमरस्त्रिजयसिरीगहिया इहकंदराहि बहुवा तस्सा द्विठकण्ठग्गमिस पविठु
अत्र तेन तथा समरे केशग्रहजयश्रीगृहीता यथा तस्यारयः कंदराभिः कण्ठे स्थापिता इति वस्तुना एककाले
वैसंग्रामविजयदर्शनात्तस्यारयः पलाय्य गुहास्वतिष्ठंतीति काव्यलिंगं न पलाय्य गतास्ते हि रिपवः
किंतु ततः पराभवं संभाव्य कंदराः एव तान्परिजंतीत्यपह्नुतिश्च व्यज्यते यत्र केशग्रहणवलात्कृतोद्दी
पितसाहचर्यं कंदरास्तासु हि धृतान्कण्ठे स्थाप्यंतीत्युत्प्रेक्षात्र व्यज्यते इति तत्र वेदेव यदिष्टं केकंदरादीनां ना
यिकात्वारोपस्य नात् अन्यथा केशग्रहणस्य मदनोद्दीपकतायोगात् तदभ्युपगमे च वस्तुमात्रस्य व्यंज
कत्वं किंतु समासोक्तेरलंकारस्य अर्थेनैवालंकारेण वस्तुनो यथा गाढालिंगणरहसुज्जअम्मि दइए लहु
हुसोममयार माणंमिणीणमाणेपीलणभीरुप्पहिआहि अत्र पीडनभीत इवेत्युत्प्रेक्षया प्रत्यालिंगना

का॰ प्र॰ ३२ 32 दिनत्रयं भनइ इति वस्तु ध्वन्यते । अत्रैवालंकारेणालंकारस्य यथा । जाठेरं वहसंतीकइवग्रणंवहडविणिवे
सा दावेइ भुवणमंडलमण्णं विअ जअइ सा वाणी । अत्र जाठेरं वहसंतीत्युत्प्रेक्षया लंकारेण चमत्कारैक॰
कारणत्वं नवं नवं जगदम्बुजासना निर्मिमीत इति वाण्या ब्रह्मणो व्यतिरेकः प्रकाश्यते यद्युत्प्रेक्षां विना
पि व्यतिरेकोयं प्रकाश्यते नियमीत्वादिवत् । न थापि न स्फुटो भवति यदा तावन्मात्रं व्यंजकत्वे पुत्प्रेक्षा
या व्यंजकत्वं न हीयते । कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नव्यंजनकार्यस्य ध्वनेर्भेदचतुष्टये वस्तुना
वस्तुनो व्यक्तिर्यथा । जे लंकागिरिमेखलाहि खलिदा संभोअखिण्णोरईफारफुल्लफणावलीकवलने॰
पत्ता दरिद्दत्तणं । ते इण्हिं मलयानिला विरहिणीणीसाससंसग्गिणो जादा झत्ति सिसुत्तणे वि बहला
तारुण्णपुण्णा विअ ॥ अत्र यथोक्तेन वस्तुना निश्वासेन प्राप्तपुष्टयो मलयानिलाः किं किं न कुर्वन्तीति व्यज्यते
तारुण्यपुष्ट्या प्रवृत्तस्य व्यापारस्यावनुपयोगात् । न चैवमस्याप्रयोजकत्वं उक्तिविशेषोपरिपोषकत्वात् । नि
श्वाससंपर्कस्य बहुलत्वहेतोरुपादानात् काव्यलिंगस्यैव व्यंजकत्वमिति चेन्न तस्य हेतुत्वाविवक्षायामपि त
था व्यक्तेः । तत्रैव वस्तुनालंकारस्य यथा । सहि विरहिऊण माणस्स मज्झ धीरत्तणेण आसासं पिअदंसणवि
हलंकाणखणम्मि सहसत्ति तेण ओसरिअं ॥ अत्र प्रियदर्शनविह्वलत्वं तेन धीरत्वेनापसृतमिति वस्तु
ना हेतोपि प्राप्तेने मा प्रसन्नेति विभावना । नूनं प्रियदर्शनसौभाग्यबलं धैर्येण सोढुं न शक्यत इत्युत्प्रेक्षा
पि व्यज्यते । अत्रैवालंकारेण वस्तुनो यथा । तल्लोलकरअल्लणाअपहिं तु हलोअणेहं महदिस्सं रंगेह

ऽप्पसाओ कोवेण पुणो इमेण अअक्कमिआ अत्र किमिति लोचने ऊपि नेवहसीति अत्रोन्नयनालंकारेण कोवेण
पुणो इमेण अअक्कमिआइत्यपह्नुत्यलंकारसहितेन रके वलमाई त्तमाणि गोपयसि किं तु ने षामहं प्रसाद
पात्रं जातेति व्यज्यते नेति व्यज्यते अत्रैवालंकारेणालंकारस्य यथा महिलासहस्सभरिये तुह हि अए सुहअ सा
अ अमाअन्तो दिअहं अणण्णकम्मा अंगं तणुअं पि तणुएइ अत्र महिलासहस्रभरिते तव हृदि स्थानं लभ्यते न नो
ग तन्वपि तनीयतीति हेत्वलंकाराभ्यां तनोस्तनूकरणेपि न वहृदये न वर्तते इति विशेषोक्तिः अत्र कविनिव
द्धस्य वीवक्ती एवमर्थशक्त्युद्भवस्य द्वादशभेदाः शब्दार्थोभयभूरेकः यथा अतंद्रचंद्राभरणा समुद्दीपि
तमन्मथा तारकातरला श्यामा सानंदं न करोति किं अत्र श्यामारूपकामिनीविशेषवरजन्योहपमा...
सा चानंद्र चंद्रेत्यादेः परिवृत्यसहनयाः समुद्दीपितेत्यादेस्तु तत्सहनयोभयस्यापि व्यंजकत्वेन शब्दार्थोभ
यशक्तिमूला भेदाश्चाष्टादशास्यनत १८ अस्य ध्वनेः ननु शब्दार्थोभयभूय: ननु रसादीनां वक्तृत्वाद्दृष्टाद
शत्वमनुपपन्नमत आह रसादीनामनंतत्वाद्भेद एको हि गण्यते कथमनंतत्वं रस्य नव रसान त्रयणां
रस्यैव द्वौ भेदौ संभोगो विप्रलंभश्च तत्र संभोगस्य परस्परालिंगनादयो बहवो भेदाः विप्रलंभस्याभिलाषा
दयउक्ताः तयोरपि भावानुभावव्यभिचारिवैचित्र्यं तत्रापि नायिकयोरुत्तममध्यमाधमप्रकृतित्वं तत्रापि देश
कालावस्थाभेद इत्येकस्यैव रसस्यानंत्यं का ननु सर्वेषां ऊनत्वसंख्येकत्वेन गणनं असंलक्ष्यक्रमत्वरूपमेकं सा
मान्यमाश्रित्य वाक्योक्तेरुत्यः शब्दार्थोभयशक्तिमूलो ध्वनिर्वाक्ये एवमनुनार्यं नियमाशिशुपालवधे तः

का० स्फुटमेवोक्तो प्रबंधेऽपि दर्शनादिति चेन्न तत्र भयशक्तिमूलत्वेपि ध्वनित्वाभावात्तुल्यप्राधान्यात् ब्राह्मणातिक्रम
प्र० त्याग इतिवत् अन्यत्राप्येवं संभाव्यत इति चेत्संभाव्यतां नन्वकापि निर्णीयते येन तदादाय विभागः स्यादिति ।
३३ पदैकदेशे अन्ये सप्तदश ध्वनिभेदा वाक्ये पदे इति ननु पदस्य व्यंजकत्वे किमायातं वाक्यरूपस्य काव्यस्य ध्वनित्वे ।
33 कथं वा पदमात्रस्य व्यंजकत्वे वाक्यस्येव समस्तस्य चारुत्वमिति चेदुच्यते पदप्रकाशत्वेन पदमात्रस्य व्यंज
कत्वं किं तु तस्य प्राधान्येनाविवक्षितवाच्ये पदमात्रस्य व्यंजकत्वेपि यद्वाच्यवर्ति शब्दस्पार्श्वं वाक्यस्यापि स्फु
तिशयितार्थव्यंजकत्वं न द्वाक्यस्येव ध्वनित्वमित्यभ्युपगमात् न कश्चिद्दोषः एकत्रास्थितेन च नादृश पदे
न समस्तमेव वाक्यं चारुतामुपगच्छतीति कामिनीशेकावयवस्थितेन भूषणेन तदुक्तं ध्वनिकृता एका
वयवसंस्थितेन भूषणेनेव कामिनी पदद्योत्येन सुकवेर्ध्वनिना भाति भारतीति न च वाक्यस्य व्यंग्यमुदाहृतं प
दव्यंग्यमुदाह्रियते तत्राप्यविवक्षितवाच्यभेदाये अर्थान्तरसंक्रमितवाच्यं यथा यस्मिन्मित्राणि मित्राणि मा
त्रवः शत्रवस्तथा अनुकंप्योऽनुकंप्यश्च स जातः स च जीवति अत्र द्वितीयो मित्रशब्दः प्राप्तुत्वे शत्रुशब्दोऽति
ये त्वे अनुकंप्यशब्दः स्नेहपात्रत्वे संक्रमितवाच्यः नायकस्य हृदयप्रकृतिकत्वं व्यंग्यं ननु तावमस्मिन्नेव श्लोके वि
डंबामिति वाक्यप्रकाश्यध्वनेरेवमुदाहृतं तस्मादस्य पदप्रकाश्यस्य को भेद इति चेन्न प्राधान्यात् तद्धि प्रत्येक
पदव्यंग्याभिन्नसमस्तवाक्यव्यंग्यं तस्मादत्र सर्वथा सावधानेन भाव्यमित्येवं यत्र तत्र इदं तु केवलमित्रादि
पदव्यंग्यमात्राभिप्रायमिति अत्यन्ततिरस्कृतं यथा च वहन्तीदीसं निदारुणा इव तद्विधारणां हि वच

स्य वक्तृमुखाणं ह्रुचवसांतविमुह्यति अत्र मोहे नाम वृत्तिर्लिङ्गेनैव न तु वाच्यस्य कथमपि प्रवेशः इष्टका
र्यकारित्वं च व्यंग्यं यद्यपि व्यवसाय मोहाभावेनान्वयायोग्यं इति तालक्षणं न यद्यपि धीराणामधीरेभ्यो वेल
क्षणं प्रतिपाद्यं न च तल्लक्षणं विना संभवति अधीरव्यवसायेपि मोहाभावात् इमं वश्यं लक्षणं स्त्रीकार्यं
लक्ष्यक्रमव्यंग्यं यथा लावण्यं तदसौ कांतिस्तद्रूपं स वचःक्रमः सदा सदास्पदमभूद्धनानुज्ज्वेश महान्
अवयवसंस्थाने साष्टवं रूपं अवयवविन्यस्तं तद्वल्लावण्यं कान्तिरुज्ज्वलता अत्र विप्रलंभार्थवाक्ये अनुभ
वैकगोचरमर्थं प्रकाशयतां नामपदानां प्राधान्यं एवमग्रेपि न केवलं सर्वनाम्नामेव रसादिव्यंजकता किंत्वन्ये
षामपि यथा कुरंग्य कुरंग्यमये वृत्तीनु मखिलः कालः किमारभ्य मानमानं यत्तद्वद्धिंतिवयान सन्मुखतां हृदीश
स्य प्रियस्य सख्यैव प्रतिबोधिताप्रतिवचस्तमाह भीतानननानीचैः शुष्कसहादिस्थितोहि न त्वमेष शाठ्येश्वरः क्रोश
यति अत्र भीताननेति पदं नीचैः शुष्कसनविधानस्य योग्यतां प्रकाशयति प्राधान्येन रागातिशयं व्यंजयति
भावादीनां वाक्येपि न चारुत्वं पदप्रकाश्यत्वेपि हेतुतरामतस्तन्ने भेदानां चारुत्वं नेललक्ष्यक्रमव्यंग्यध्वनिप्रभेदेषु
प्राह्नशब्दं प्रमिति काव्यस्य प्रभेदं निरूपिते शाक्रावरतया दोषाभावादीनि लक्षणस्थानानि विशेषणानि विवेच
नीयानि तेषु च दोषाभावः प्रधानं सति दोषे गुणादेरप्यकिंचित्करत्वात् यदाहुस्ताहशः स्वदरमपि श्वित्रेणैके
न दुर्भगं इति सति तु दोषाभावे गुणादिकं विनापि किंचिदाह्लादसंभवात् अपदोषतैव विगुणस्य गुण इति
न्यायात् अतः प्रथमं तावन्निरूपणीयेऽभावस्य स्वरूपं तेन निरूपणं तन्नप्रतियोगिनिरूपणाधीन॥

निरूपणीयत्वाद्धेयापरिचये तज्ज्ञानासंभवाच्च दोषा निरूपणीयाः नच सामान्ये विज्ञाते विशेषे जिज्ञासेति त
त्सामान्यलक्षणमाह मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः उभयोपयोगिनः स्युः शब्दाद्यास्तेन
तेष्वपि सः १ मुख्यार्थस्य हतिर्यस्मादिति व्यधिकरणत्वेपि गमकत्वाद्बहुव्रीहिः करणसाधनो हतिशब्द इत्ये
के मुख्यत्वमर्थस्य नच शक्यत्वलक्षणं येनार्थासंगतिः स्यात् किं त्वन्यदित्याह रसश्च मुख्य इति रस्यत इति मु
ख्यार्थरसशब्देन भावादिरपि संगृह्यते नन्वेवं नीरसे शुनकश्चिद्दोषः स्यात् विघाताभावात् इत्यत आह त
दाश्रयाद्वाच्य इति आश्रयणमाश्रयः तथा च तेन रसेनाश्रयणमुपकारित्वेनापेक्षणं तस्माद्वाच्योपि मुख्य इत्य
र्थः नचैवं मुख्ये शब्दस्य नानात्वेनाननुगमः काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात् तदेवं रसव
ति सर्व एव दोषा नीरसे त्वविलम्बितचमत्कारिवाच्यार्थप्रतीतिविघातका एव हेया इति मन्तव्यं नन्वेवं तयो
रेव दोषाधारत्वमुचितं न तु शब्दानामित्यत आह उभयोपयोगिन इति अत्र शब्दपदं प्रतिपादनात्मकशब्दना
व्यापारवतोः पदवाक्ययोर्वर्तते तेनाद्यपदाहरणरचने संगृहीते इति प्रकाशः स्वरसः न च तत्र बीजाभावः अन्य
था वर्णस्यापि पदशब्देनैव प्राप्तौ शब्दाद्या इति बहुवचनासंगतेः स्यादेतत् हतिर्विनाशः न च दोषेण रसा
नाश एतेन तस्मादलक्षणमेतत् मैवं हतिशब्दस्यापकर्षवाचित्वात् नन्वेवं रसानुत्पत्तिप्रयोजकेष्वव्याप्तिः
मुख्यानुत्पत्तिरेव हतिशब्दार्थः न हि यत्र रस उत्पद्यत एव परं तत्रापकृष्यते तत्राव्याप्तिः तदेतल्लक्षणमति
दरिद्रं दर्पणः क्वचान्तरनिष्ठावगुण्ठनीयवसनमिवैकेनापकृष्यमाणमपरं परिहरति किं चार्थरूपस्य

मुख्यार्थस्यानुत्पत्तिरपकर्षो वा न दोषाधीन इति अत्र प्रमत्तहृदयप्रतीतिविघातलक्षणोऽपकर्षो हि इति शब्दार्थः उ
द्देश्यायाश्च प्रतीतिः रसस्य तत्परत्वावलम्बितानपकृष्टरसविषयाश्चेतो रसेन्नु अविलम्बिताचमत्कारिणी चार्थविषया
तथाच तात्पर्यप्रतीतिविघातकत्वं सर्वेषामविशिष्टं यतो दुष्टेषु कस्यचिदस्याप्रतीतिरेव कस्यचित्प्रतीयमानस्याप्यप
कर्षः कस्यचित्तु विलम्बः एवं नीरसे काव्ये दर्थस्य मुख्यस्य तस्याप्रतीतिरेव कस्यचिद्विलम्बेन प्रतीतिः कस्यचिदचम-
त्कारित्वं त्वनुभवसिद्धमित्यदृष्टप्रतीतिविघातो वा क एव तद्विघातकाच कस्यचित्साक्षात्त्वात् यथा रसदोषाणां
कस्यचित्परस्परया यथा शब्दादिदोषाणां तेष्वपि कस्यचिदर्थोपस्थित्यभावात् यथासमर्थत्वादेः कस्यचित्त
द्विलम्बात् यथा निहतार्थत्वादेः कस्यचिद्वाक्यार्थबोधाभावात् यथा च्युतसंस्कृत्यादेः कस्यचित्तद्विलं
बात् यथा क्लिष्टत्वादेः कस्यचित्सहृदयैर्मुख्यव्यथमानाधायादनेन यथा व्याहतत्वादेः कस्यचित्स्वरूप-
सन एव यथा निरर्थकत्वादेः कस्यचिद्धि शोभापस्थापनेन विपरीतोपस्थापनेन वा यथा विरसविरुद्धमति
कृत्वादेरित्यायूहनीयं विघातकत्वं च कस्यचिज्ज्ञानस्य यथा व्याहतस्य कस्यचित्स्वरूपसन एव यथा निहत
त्वादेः स चायं हि विघातो नित्यश्चानित्यश्च तत्रानुकरणादन्येन प्रकारेणासमाधातुमशक्यो नित्यः यथा च्युतसं-
स्कृत्यादिः अन्यः स्वशक्यानित्यः यथा श्रुतिकटादि प्रायविशेषलक्षणानि वक्ष्यमाणानि तत्र हि विघातोऽयं त्रिविधः
शब्ददोषोऽर्थदोषो रसदोषश्चेति तत्र शब्दार्थरसानां यथा पूर्वमुपस्थितिः प्राथमिकी इति तत्क्रमेणैव दोषानि
रूपणीयाः तत्र तन्मूलदोषो शब्दार्थविन्यत्रकाव्यलक्षणेऽपि शब्दस्य प्राङ्गुद्देशात्त्वं शब्ददोषाणां प्राथम्यं शब्द-

का॰ स्तु त्रिधा पदं तदेकदेशो वाक्यं च एवं च तदाश्रितः शब्ददोषस्त्रिविधः न त्वपदानां वाक्यघटकत्वेन शब्दमस्या-
३५ त्वश्यमतद्दोषनिरूपणमिति परमार्थः अत्रेदं शक्यते एवं पदैकदेशस्य पदापदत्वयापि आवश्यमात्तद्दोषनिरू-
35 पणस्यैव आवश्यकस्यमर्हतीति अत्र भास्करः सत्यमुच्यते परं तु पददोषश्चैव यथासंभवं केचित्पदैकदेशाश्र-
ति समाद इत्यथे तन्नातिमनोरमं अस्त्वेवं तथापि पदैकदेशदोषत्वेन पृथगभिधानापादने किमुत्तरमिति वयं
त्वालोचयामः उपदेशेनावश्यम स्यादि विचारणातिदेशस्य पदेशानंतरमेव न च पदैकदेशदोषोपदेशः
अतिदेशेनैव न हि लाभे लाघववान् न च पदैकदेशाद्वा स्वरूपदेशः पदेवातिदेश इति वाच्यं पदैकदेशादृश्रीनाम-
मपि केषांचित्पदवृत्तित्वेन तदर्थं पदेषूपदेशस्यावश्यकत्वादिति पददोषविशेषलक्षणमाह दुष्टं पदं श्र-
तिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थं निहतार्थमनुचितार्थं निरर्थकमवाचकं २ ५१ संदिग्धमप्रतीतं ग्राम्यं
नेयार्थमथ भवेत् क्लिष्टं अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव १ ५२ दुष्टं पदमिति प्रत्येकम-
भिसम्बध्यते नन्वत्र श्रुतिकटु प्रभृतिशब्दानां लक्षणे विभागमात्रात्तदनुपस्थितौ कथं लक्षणवाक्यत्व-
निर्वाह इति उच्यते रूढियोगाभ्यामुभयार्थोपस्थितौ लक्ष्यलक्षणयोरुभयोरपि प्रत्ययः यथा श्रोत्ररसन-
चक्षुस्त्वक् घ्राणानि इन्द्रियाणीभूतेभ्य इतीन्द्रियलक्षणसूत्रे गोतमीये अथैतेषां लक्षणवाक्यत्वे त्रिधाश्री-
लमित्यत्र त्रिधेति निरर्थकं तस्य विभागमात्रार्थत्वेन लक्षणानुपयोगादिति चेन्न अश्लीलशब्दस्य व्रीडादिव्यं-
